## 2553. ĀŚVALĀYANASARVAPṚṢṬHĀPTORYĀMA-SAPTAHAUTRAPRAYOGAḤ.

Burnell's Catalogue No. 4148. Page 25. Left column. Substance—Paper. Size—10×4⅞ inches. Sheets—25. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—?. Incomplete.

Beginning and subject—Same as No. 2550.

End:

इरज्यन्त यच्छुरथो विवाचोम् ३ । न हि श्वमायुश्चिकिते जनेषु । तानीदं हांस्यति पर्षत्सोम् ३ । युजेरथं गवेषणं हरिभ्यां उपब्रह्माणि जुजुषाणमस्थोम् ३ । विवाधिष्टस्य रोदसी महित्वा ॥ इन्द्रो वृत्राण्यप्रती च धन्वोम् ३ । आप- श्चित्पिप्यु................ ॥

Colophon : Nil.

Remarks :—The Ms. is in good condition. It breaks off in the middle.

---

॥ सर्वपृष्ठाप्तोर्यामौद्गात्रप्रयोगः ॥

## 2554. SARVAPṚṢṬHĀPTORYĀMAUDGĀTRA-PRAYOGAḤ.

Burnell's Catalogue No. 4188b. Page 25. Left column. Substance—Paper. Size—11½× 3⅞ inches. Sheets—13

(9-21). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—960 Author—(?). Complete.

Beginning:

नमो रामाय सीतायै लक्ष्मणाय हनूमते ।
द्राह्यायणमुखेभ्यश्च कर्तृभ्यः सूत्रसंहतेः ॥
आलोच्य ब्राह्मणं सूत्रं तद्भाष्यं चासकृत्तथा ।
अप्तोर्यामक्रतोः क्लृप्तिः क्रियते सामगप्रिया ॥

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविंशं होतुः पृष्ठं छन्दो मा इतराणि त्रिणव आर्भवस्त्रयस्त्रिंशोऽग्निष्टोमः प्रत्यवरोहिण्युक्थ्यानि त्रिणवम्प्रथममथैकविंशमथ सप्तदशमेकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिस्त्रिवृत्प्रथममतिरिक्तस्तोत्रमथ पञ्चदशमथ सप्तदशमथैकविंशं प्रजापतिः पशूनसृजत ।

End:

तद्धौ हो वा । इति स्तावः । शं यत् । हा । औ हो इ गा वा इ । इति प्रतिहारः । ए । किरे । इति सर्वे । एवमुत्तरयोः । यजमानवाचनादिभक्षणान्तं कृत्वा । पूर्ववन्निष्क्रम्य समस्तोपस्थानादि यजमानोपहवान्तं कृत्वा । वारवन्तीयस्य साम्नः इन्द्र ऋषिः । गायत्री छन्दः । विष्णुर्देवता । विधायकादि पूर्ववत् । अग्नेरुद्गीथ इत्यादि । सम्भ्यो हिङ्करोतीत्यादिकुशाविधिः । इदं विष्णा । औ हो हा इ । इति प्रस्तावः । सामूढम् । आ इति प्रतिहारः । डा इति सर्वे । एवमुत्तरयोः । यजमानवाचनादि-

भक्षणान्तं कृत्वा स्तोमविमोचनाद्युदवसानीयान्तं ज्यो- तिष्टोमवत् हार्योजनभक्षणे तिरोह्नस्थेति विशेषः ।

Colophon :

इति क्रत्वन्तरसर्वस्तोमसर्वपृष्ठाप्तोर्यामः समाप्तः ।

Subject: Āptoryāmasarvapṛṣṭhaudgātraprayoga, giving the duties of the Udgātṛ priest in the Aptoryāma sacrifice.

Remarks :— The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2545.

---

## ॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

## 2555. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

J. L. Collection No. 250. Substance—Paper. Size—$9\frac{1}{4} \times 4$ inches. Sheets—57. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4387. Author—(?). Complete.

Beginning :

अग्निञ्चेष्यमाणोऽमावास्यायां पौर्णमास्यामेकाष्टकायां वोखां संभरति । त्र्यहादिदीक्षापक्षे उखासम्भरणप्रभृत्या- मिक्षापर्यन्तं कर्माणि । वसन्ते यथा भविष्यति तथोपक्रमः कार्यः । एकाष्टकायाञ्चेदुखासम्भरणन्तदा तस्यामुखास- म्भरणं कृत्वा पश्विष्ट्यादि सर्वं वसन्ते कार्यम् । चतुरो मास इत्यस्मिन् पक्षे एकाष्टकायान्न लभ्यते । मासादिप- क्षेपूखासम्भरणप्रभृति सर्वं वसन्ते कार्यं पशुश्च यथा भवति । एवं स्मृत्वारम्भः कार्यः । अथाग्निप्रयोग उच्यते ॥

End :

प्रयास्यन्नाग्निभिरग्निं यजमान उपतिष्ठते । "अयं ते योनिः" इति प्राजहितꣳ समारोप्य प्रागुदङ्ङोदवसाय । "उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानꣳ स्वे दमे ॥ स नः पितेवसूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥" तिसृभिरन्येषां यजमानानां चित्यग्निं दृष्ट्वा-नुपतिष्ठते । "इदमूनुः श्रेयोऽवसानमागन्म" इत्यादि । अथ सायमग्निहोत्रं जुहोतीत्यन्तं समानम् । सन्तिष्ठतेऽग्निः । अग्निं चित्वा अनन्तरपर्वणि सौत्रामण्या यजेत । अपरेद्युर्मै-त्रावरुण्याचामिक्षया ॥

Colophon :

अग्निचयनं समाप्तम् ॥

Subject : Āpastambamahāgnicayanaprayoga, based on 16th and 17th praśnas of the Āpastambaśrautasūtras.

Remarks :—The Ms. is in a fairly good condition.

---

॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

## 2556. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9174 a. Page 25. Right column. Substance—Palm leaf. Size—16 × 1⅜ inches. Leaves—36 (1—36). Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—600. Author—(?). Complete.

Beginning:

ॐ यज्ञेश्वरचरणारविन्दाभ्यां नमः । लक्ष्मीनारायणा-

भ्यां नमः । सिद्धिविनायकाय नमः । सीतारामाभ्यां नमः । अग्निञ्चेष्यमाणोऽमावास्यायां पौर्णमास्यां पूर्वपक्षे वा पुण्ये नक्षत्रे उखां सम्भरति । आषाढामधिकृतेभ्य...श्चेष्यमाण उपकल्पयते वैणव्यश्रिररत्निमात्री अश्वगर्दभरशने अश्वगर्दभौ मृत्खननं वल्मीकवपा हिरण्यं पुष्करपर्णानि कृष्णाजिनानि क्षौमदाम मौञ्जदाम वा पुष्पफलवत्य ओषधयः कूर्मं कपालपिष्टानि वेण्वङ्गारपिष्टानि व्रीहि तुषाः पलाशकषायं पिष्टाः शर्कराः अजलोमानि कृष्णाजिनलोमानि वराहविहतं पूतीका अष्टाश्चुखा अपरिमिताः सिकताः अषाढाषाढा सप्ताश्वशकानि लोहितपचनीयानि अजाक्षीरं एकविंशतिर्माषा हिरण्मयं मृन्मयं वा पुरुषशिरश्श्वेतपशुरश्वङ्गः पलाशशाखाः प्लक्षशाखा उदुम्बरशाखाः स्वधितिर्यूपस्सचषाळस्तरुराधिमन्थनश्च शकलः पौतुद्रवाः परिधयः गुग्गुलुसुगन्धिनेजनं श्वेतोर्णास्तुका प्रणयनीयमिध्मं द्वे स ते(?) अपरिमितं बर्हिस्त्रय इध्मौ आश्ववालः प्रस्तर ऐक्षवी विधृती काश्मर्यमयाः परिधयः ।

End :

आद्यस्य च तृतीयस्य ब्रह्महेत्यनुमन्त्रणम् ।
इन्द्रियाव्यन्नाद इति सप्तमस्यानुमन्त्रणम् ॥
इतरेषां भवे[त्] षण्णामन्नादस्त्वनुमन्त्रणम् ॥
सहावदाय सर्वेभ्यः स्विष्टकृत्तु प्रचर्यते ।
अग्निः केवल एव स्यात्स्विष्टकृत्प्रैषवानपि ॥
रौद्रशेषं क्षिपेदप्सु प्राशित्रेडन्न तस्य तु ।

पशुपुरोडाशं मैत्रावरुणषष्ठा भक्षयन्ति मैत्रावरुणवर्ज-
मितरान् भक्षयन्ति । इडान्तात्मपुरोडाशाः सन्तिष्ठन्ते ।
स्रुवेण पृषदाज्यस्येत्यादि पत्नीसंयाजान्तोऽग्नीषोमी-
यस्सन्तिष्ठते । वसतीवरीपरिहरणादि सवनीयस्य पशोः
परिस्तरणान्तम् । महारात्रे बुध्वेत्यादि हृदेत्वा सोमराज-
न्निति ॥ २० ॥

Colophon : Nil.

Subject : Āpastambamahāgnicayanaprayoga, based on the 16th & 17th Praśnas of the Āpastamba Śrauta Sūtras. This Ms. contains two main sections:—

1. प्रथमाचितिः 1—26 Khaṇḍas
2. द्वितीयाचितिः 1—20 ,,

Remarks :—The Ms. is in a decaying condition.

---

## ॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

## 2557. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9174 b. Page 25. Right column. Substance—Palm leaf. Size—16 × 1⅜ inches. Leaves—5 (37-41). Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—80. Author—(?). Prathamaciti only. Incomplete.

Beginning—Same as No. 2556.

End :

अग्निभ्यः कामाय पशूनालभते मुष्करान् अपि वा
सर्वेषामेतेषां स्थाने वायवे नियुत्वते श्वेतमजन्तूपरमाल-

मते । देशकालौ सङ्कीर्त्य परमेश्वरप्रीत्यर्थं वायव्येन पशुना यक्ष्ये + बृहद्भा इत्यादि समानमावपाया होमात् ।

विहारभेदादेतस्मिन् पाशुकीदक्षिणा मता ।
प्राजापत्यः पुरोडाशस्याद्द्वादशकपालकः ॥

कपालयुग्ममन्त्राणां द्विद्विरावृत्तिरिष्यते ।
घर्तुश्चिन्मरुतां शर्धश्चितस्थेति तु युग्मकाः ।

Colophon : Nil.

Subject : Āpastambamahāgnicayanaprayoga, prathamaciti—1—7 Khaṇḍas only.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly ends in the middle of the Seventh Khaṇḍa of the First citi. The other work contained herein is **बोधायनमहाग्निचयनम्**. At the end of the work, there are 19 fragmentary leaves dealing with ten different subjects quite related to Śrautaprayogas, as follows :—

| | Beginning of the subject | No. of Leaves. |
|---|---|---|
| 1 | पुच्छाग्ररीतावर्थैका सा वायव्यदिगग्रका<br>तदुदक् षोडशी प्राग्ग्रा चोदगग्रा च संमता ॥ | 1 |
| 2 | पञ्चम्यन्त्याक्रमण्याख्या तुर्या मध्या तु मण्डला ।<br>आरोहेदुत्तरे वामा द्वितीया सप्तमावलौ ॥ | 2 |
| 3 | आद्या नवम्या क्रमणी द्वादश्याद्या तु मण्डला ।<br>अन्वारोहे आदिमायां दशम्येकादशी त्वपि ॥ १ ॥ | 2 |
| | (1-32 verses) | |
| 4 | अथ द्वितीये प्रस्तारे शुल्बोपहितिरुच्यते ।<br>पुच्छाग्ररीतावर्थैका सा वायव्यदिगग्रका ॥ | 2 |
| 5 | .........वटीयत: पश्चादवशिष्येत्त सञ्चरम् । | |

शङ्कुस्त्वनुशिरोग्रीवस्तत्पश्चात्प्रक्रमद्वये ॥ 1

6 उपवेषोद्वावसनेवभृथकर्म भवेदिह ।

परिस्तराहुतिः पूर्वं ततश्च परिभोजिनीम ॥ 1

7 ॐ देशकालौ सङ्कीर्त्य एकाहं सवनत्रयं गणैर्होष्ये इति प्रथमं सङ्कल्प्य प्रातःसवनिकैर्गणैर्होष्य इति द्वितीयम्...... Leaves 3

8 ஏற்கலகம்—௬ கொடம்—௩

காகம்—௫ பாத்ரசெருக—௫

ஸ்தாலீபிங்கா—௬ பெரியபாத்ர—௫

பால்ச்சட்டி—௬ பசுகும்ஜீ—௨

கரிச்சட்டி—௫ அரிக்கம் செட்டி—௨

பெரியதீர்த்தச்சால்—4 Leaves—5

9 अथैतमग्निं प्रत्यञ्चं यूपवाटी···च्छाकोर्वामिमीते ।

अथ वेदिमानानन्तरमाहुतिविशेषे सङ्कल्पिते एतमग्निम् । 1

(6th leaf only)

10 यो अश्वत्थः अश्वत्थः हव्यवाहाद्धि वैश्वानरस्य

---

## ॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

## 2558. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9175&9173. Page 25. Right column. Substance—Palm leaf. Size—14¾ × 1¼ inches. Leaves—83. Lines—7 to a Page. Script—Grantha. No. of Granthas—1450. Author—(?). Incomplete wants end.

Beginning :

अग्निञ्चेष्यमाणः अग्निरिति स्थण्डिलमिष्टकाकृतमुच्यते ।

तश्चेष्यमाणः त्र्यहदीक्षापक्षे उखासम्भरणप्रभृति आमिक्षापर्यन्तानि कर्माणि वसन्ते यथाभवन्ति। पर्वण्युखासम्भरणपक्षे एकाष्टकायाश्चेत्तस्यामुखासम्भरणम्; परिश्रिष्ट्यादि सर्वं वसन्ते। चतुरो मासो दीक्षित इत्यस्मिन् पक्षे एकाष्टकायां न लभ्यते। साग्निचित्यस्य क्रतोः प्रयोग उच्यते ॥

पर्वणोरेकाष्टकायां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पं करोति। द्वादशाहेनाहीनभूतेन साग्निचित्येन यक्ष्ये सर्वपृष्ठेन सर्वस्तोमेनान्वहन्द्वादशशतदक्षिणेन। प्रजायेय स्वर्गं लोकमवाप्नवानि ॥

End:

पुरस्तात् प्रातरनुवाकादग्निं युनज्मीति तिसृभिरभिमृशन्नग्निं युनक्ति।

"अग्निं युनज्मि शवसा घृतेन दिव्यं सुपर्णं वयसा बृहन्तम्।
तेन वयं पतेम ब्रध्नस्य विष्टपं सुवो रुहाणा अधिनाक उत्तमे ॥
इमौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहंस्यग्ने।
ताभ्यां पतेम सुकृतामुलोकं यत्रर्षयः प्रथमजा ये पुराणाः ॥
चिदसि समुद्रयोनिरिन्दुर्दक्षश्श्येन ऋतावा।
हिरण्यपक्षश्शकुनो भुरण्युर्महान्त्सधस्थे(ध्रुव आनिषत्तः) ॥"

**Colophon**: (Leaf 46).

चतुर्थी चितिस्समाप्ता ॥

Subject: Āpastambamahāgnicayanaprayoga consisting of the following divisions :—

| | | | | | |
|---|---|---|---|---|---|
| I | 16th | Praśna. | प्रथमा चितिः | Leaf No. | 1—37 |
| II | 17th | ,, | द्वितीया चितिः | ,, | 37—40 |
| III | ,, | ,, | तृतीया चितिः | ,, | 40—43 |

IV 17th Praśna चतुर्थी चितिः Leaf No. 43—46

V ,, ,, पञ्चमी चितिः ,, 46—?

**Remarks** :—The Ms. is in a fairly good condition. The two Mss. Nos. 9175 and 9173 form one work, and are here treated as one Ms. There are 3 loose broken leaves at the end of this Ms. which however treats of the measurements of Somaciti and various dīkṣās in Soma sacrifices.

---

॥ आपस्तम्बमहाग्निचयनप्रयोगः ॥

## 2559. ĀPASTAMBAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9171 b.

Substance—Palm leaf. Size—15½ × 1½ inches. Leaves—8. Lines—8 to a Page. Script—Grantha. No. of Granthas—110. Author—Prathamaciti only. Incomplete.

Beginning :

(साग्निचित्य)स्य क्रतोः प्रयोग उच्यते । पर्वणोरेकाष्टकायां प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पं कृत्वा द्वादशाहेनाहीनभूतेन साग्निचित्येन यक्ष्ये । सर्वपृष्ठस्तोमेनान्वहन्द्वादशशतदक्षिणेन प्रजायेय स्वर्गं लोकमवाप्नवानि । विद्युदसि । अस्मिन्नहीनभूतद्वादशाहे सोमप्रवाकं त्वां वृणीमहे ॥

End :

एकैकमुदपात्रं सर्वासु सीतासु निनयति कर्षक्रमेण । "या जाता ओषधयः" इति चतुर्दशभिरोषधीर्वपत्यनुसीतमित्यु(क्तम् । सप्तग्राम्याः कृष्टे वपति, स)प्तारण्या अकृष्टे । या जाता ओष+श्च । द्वादशसु सीतासु तिला-

न्वपति । एवमुत्तरानावपति । शतं वो+कृत । माषान् । पुष्पवतीः+ष्णवः । व्रीहीन् । ओषधी....न् (+चातयमानाः । यवान्) अश्वत्थे +पूरुषम् । प्रियङ्गून् । यदहम् + यथा दारूमान्(अणून्) ॥

Colophon: Nil.

Subject: Mahāgnicayanaprayoga—Prathamaciti only.

Remarks:—The Ms. is in a decaying condition. This abruptly ends in the middle of the first Citi. For the other works contained herein see Remarks under No. 2326.

---

## ॥ बोधायनमहाग्निचयनप्रयोगः ॥

## 2560. BODHĀYANAMAHĀGNICAYANA-PRAYOGAḤ.

J. L. Collection No. 251. Substance—Paper. Size—13⅛ × 5½ inches. Sheets—42. Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—?. Incomplete.

Beginning:

श्रीमहागणपतये नमः । श्रीमद्दिव्यलक्ष्मीनृसिंहाय परमगुरवे चित्सभापतये नमः ।

बोधायनीयकर्मान्तद्वैधकल्पानुसारतः ।
वक्रपक्षः श्येनचितः प्रयोगः प्रवितन्यते ॥

"उखास्सम्भरिष्यन्नुपकल्पयते + अधिकरणीमुखाकृतं कुशलम्" इति । अथामावास्येन वा हविषेष्ट्वा नक्षत्रे वोखां सम्भरति । अमावास्यायां पौर्णमास्यां वेति कल्पान्तरम् ।

नान्दीमुखादिषट्कञ्च श्रद्धाहानादिषट्तयम् ।
अग्नेरर्थं विशेषेण यक्ष्येऽहं क्रतुनेति च ॥

सङ्कल्प्य ऋत्विग्वरणं मधुपर्केण चार्हणम् ।
ततश्च सर्वकामोऽग्निं चेष्य इत्यागुरुं वदेत् ॥
उखासम्भरणार्थान्या शालाग्न्याधेयिकी तु वा ।
गत्वा शालां मथित्वाग्नीन्विहृत्वाथ मनस्वती ॥
अथाध्वर्युः "इडादेवहूः" इति जपित्वाऽग्रेण शालां
शम्यान्यासे गर्तं खानयति ॥

End:

अथ स्वयमातृण्णामश्ममवघ्राप्याविदुषा ब्राह्मणेन सहाधिहृत्योपदधाति सुवरायोस्त्वा सदने सादयाम्यव तश्छायाया नमः समुद्राय नमः समुद्रस्य चक्षसे परमेष्ठीत्वा सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभूमतीं प्रभूमतीं(परिभूमतीं दिवं गच्छ) ॥

Colophon: (Sheet 40)

चतुर्दशोऽध्यायः ॥

Subject: Mahāgnicayanaprayoga, based on 1-46 Khaṇḍas of the 15th Adhyāya of the 14th (10th) Praśna (Agnicayanapraśna) of the Bodhāyana school of the Black Yajur-Veda.

Remarks:—The Ms. is in a fairly good condition. It breaks off towards the close of the 46th Khaṇḍa of the 15th Adhyāya of the Agnicayanaprayoga.

---

## ॥ बोधायनमहाग्निचयनप्रयोगः ॥

## 2560. BODHĀYANAMAHĀGNICAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3758. Page 25. Right column.

**Substance**—Paper. Size—$10\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—72. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1220. Author—Venkaṭeśvara dīkṣita. Complete.

Beginning:

श्रीरामचन्द्राय नमः ॥ अविघ्नमस्तु ॥

विश्वेश्वरं नमस्कृत्य लक्ष्मीनारायणौ गुरू ।
वाणीं यज्ञेश्वराचार्यं दक्षिणामूर्तिमेव च ॥
बोधायनं भवस्वामिं भाष्यकारं मुहुर्मुहुः ।
प्रयोक्तृकण्ठपाठाय प्रयोगं वेङ्कटेश्वरः ॥
बोधायनीयवक्राग्नेस्तनुते हि यथामति ॥

हरिः ॐ ॥ उखाः सम्भरिष्यन्नुपकल्पयतेऽश्वञ्च श्वेतं कृष्णञ्च गर्दभञ्च तयोरवे रशने मौञ्ज्यौ वा कुशमय्यौ वाश्रिञ्च ब्राह्मणसम्पन्नां वैणवीं कृष्णबिन्दूचितां श्याममालीं सुषिरामुभयतः क्ष्णुमिति मृदञ्च भावितां करणीयां सप्तच्छिद्रामच्छिद्राञ्च वल्मीकवपां कृष्णाजिनानि पुष्करपर्णानि मौञ्जं योक्त्रमुदकुम्भं कुशतरुणकानि दूर्वाग्रन्थीनर्मकपालानि पिष्टानि शर्करा अवाञ्जनापिष्टा अजलोमानि कृष्णजिनलोमानि वैश्यं सप्तदशं सूनःमधिकरणीमुखाकृतं कुशलं यूपांशीन् सचषालाश्ववाभिमन्थनशकलान् पशून् श्वेतमग्रं गाञ्च लोलोहं तूपरं श्मश्रुणञ्च कृष्णग्रीवञ्च मेषीञ्च कपिलञ्च श्यामञ्च शुक्लपृष्ठञ्च नानावर्णञ्च सन्ध्यावणञ्चं श्वेतं कृष्णविन्दूचितञ्च + अन्यानि च पांशुकानाग्निष्टोमिकाश्च सम्भारानिति ॥ १ ॥

End:

अथैनमन्यत आग्नी(ग्नि)भिरुपातिष्ठते । आपं त्वाग्ने मन-

सेति नवभिरनुच्छन्दसं पूर्वाग्निसमारोपणादि पूर्णाहुत्या यज्ञं व्रतञ्च विमुच्य पुनरालम्भगोमतीब्राह्मणान्यथोदवसानीयया यजतेऽग्न(ग्नि)समारोपणादि सायम्प्रातरग्निहोत्रे प्रतिजुहोत्यथानन्तरे दिने पर्वणि शुक्लपक्षदेवनक्षत्रे वा देविकाहविर्भिरिष्ट्वा वा त्रैधातवीयया यजतेऽथ सौत्रामण्या यजते संवत्सरं न कञ्चन प्रत्यवरोहति नाग्निञ्चित्वा रामामुपेयात् । न वर्षति धावेत् । यदि धावेदुपावर्तेत "अन्नाद्यमेवाभ्युपावर्तत इति ब्राह्मणम् ॥ ६१ ॥

Colophon :

इति श्री गोविन्दपुरवास्तव्य बोधायनादि षट्सूत्रपारवारपारीणलक्ष्मीनारायणश्रौतिवर्य गर्भसम्भव रघुनाथदीक्षितसर्वतन्त्रस्वतन्त्र श्रीयज्ञेश्वराचार्य कृपाप्राप्त श्रौतशास्त्रधुरन्धरश्रीमन्महाराजश्रीशरभेन्द्राश्रितश्रीवेङ्कटेश्वरदीक्षितविरचितबोधायनीयमहाग्निचयनप्रयोगः समाप्तिमगमत् ॥

Subject : Bodhāyanamahāgnicayanaprayoga, based on the 14th (10th) Praśna of the Bodhāyana sūtras of the Black Yajur-Veda. 1-61 (59) Khaṇḍas.

Remarks :—The Ms. is in good condition.

---

॥ बोधायनमहाग्निचयनप्रयोगः ॥

## 2561. BODHĀYANAMAHĀGNICAYANA-PRAYOGAḤ.

J. L. Collection No, 252 Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—91 (26th missing). Lines—6 to a Page.

Script—Devanāgarī. No. of Granthas—1200. Author—Venkaṭeśvaradīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 2560.

Remarks :—The Ms. is in a fairly good condition.

---

॥ बोधायनमहाग्निचयनमन्त्रानुक्रमणी ॥

## 2562. BODHĀYANAMAHĀGNICAYANA-MANTRĀNUKRAMAṆĪ.

Burnell's Catalogue No. 3757. Page 25. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{7}{8}$ inches. Sheets—78. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—1500. Author—Veṅkaṭeśvaradīkṣita. Complete.

**Beginning:**

श्रीगणेशाय नमः ॥

विघ्नेश्वरं नमस्कृत्य लक्ष्मीनारायणौ गुरू ।
वाणीं यज्ञेश्वराचार्यं भाष्यकारं मुहुर्मुहुः ॥
प्रयोक्तृकण्ठपाठाय बोधायनमतानुगम् ।
प्रयोगः सहसोमस्य चित्यग्नेर्वेङ्कटेश्वरः ॥
तनुते सुखबोधार्थं यथामति विचारयन् ।
मन्त्रानुक्रमरूपं तं पूर्वमेवं प्रदर्श्यते ॥

श्रीगुरवे नमः । श्रीगणपतये सहस्रकृत्वो नमः ॥ नान्दीमुखा भूर्भुवः प्रजापतिः प्रीयतां याः पुरस्तात्तिथौ श्रीपरमेश्वरप्रीत्यर्थं सर्वकामोऽग्निं चेष्ये ॥ तन्म० आदित्यो देव० चन्द्रमादेव ॐ कल्पयत ॥

End:

अग्नय इदं० । येऽग्नयः पुरीष्याः प्रविष्टाः पृथिवी-
मनु । तेषां त्वमस्युत्तमः प्र णो जीवातवे सुव ॥ आपन्त्वाग्ने
मनसापन्त्वाग्ने तपसापन्त्वाग्ने दीक्षयापं ह्यमे उपसद्भि-
रापं त्वाग्ने सुत्ययापं त्वाग्ने दक्षिणाभिरापं त्वाग्नेऽवभृथे-
नापं त्वाग्ने वशयापं त्वाग्ने स्वगाकारेण अयं ते ज्योतिष
इदं यदाकूतास्त्रयोविंशतिः । एकादशिन पशुवपाहविःप्रचा-
रादि देविका हविरन्तः पञ्चदशः ॥ १५ ॥ अग्नाविष्णू
वाजस्यमेमृताषाड्कर्मणे वामे हि यजमान पञ्चदश ॥

Colophon:

इति श्रीवेङ्कटेश्वरदीक्षितकृतबौधायनचयनमन्त्रानुक्रमणी
समाप्ता ॥ हरिः ओं ॥

Subject: Bodhāyanacayan amantrānukramaṇikā—an index of mantras used in the Cayana sacrifice.

Remarks:— The Ms. is in good condition.

---

## ॥ आपस्तम्बकाठकचयनप्रयोगः ॥

## 2563. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9176. Page 25. Right column. Substance—Palm leaf. Size—16×1 inches. Leaves—40. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—800. Author—(?). Sāvitra, Nāciketa and Cāturhotra only—incomplete.

Beginning:

सावित्रचयनप्रयोगः ।

सावित्रं स्वर्गकामश्चिन्वीत । पशुबन्धे चीयते । प्रावृषि पर्वणोः पूर्वपक्षस्य वा पुण्ये नक्षत्रे प्रातरग्निहोत्रं हुत्वा गणेशपूजां पुण्याहञ्च वाचयित्वाऽपरेण गार्हपत्यं पत्न्या सहोपविश्य पवित्रपाणिः[पाणिः] प्राणानायम्य देशकालौ सङ्कीर्त्य मम+उपात्त+त्यर्थं । पशुबन्धेन यक्ष्ये इत्यादि । आत्मन्यरण्योर्वा अग्निं समारोप्य देवयजनं यागोपकरणैः सह गत्वायतनानि कल्पयित्वा उद्धृत्यापोक्ष्याग्निं मथित्वोपावरोह्य । विद्युत । आत्मसमारोपणपक्षे लौकिकेऽग्नावुपावरोह्य । विद्युत् । पुनस्त्वादित्याः+कामाः । अग्निमुपसमिन्ध्यात् । विद्युदसि + पैमि । अथ चयनसङ्कल्पः ॥

End:

राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथं वैश्वानरः प्रत्नथानाकमारुहत् । दिवः पृष्ठं भन्दमानस्सुमन्मभिः । स पूर्ववज्जनयज्जन्तवेधनं समानमज्मापरियाति जागृविहि राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथं तेनामृतत्वमश्यां+प्रतिगृह्णातु । तया+सीद । एवं ब्राह्मणपक्षे । प्रतिगृहे । राजा +णेनिर्ऋत्यो अश्वतरम् । निर्ऋत्यै गर्दभम् । गन्धर्वेभ्यस्स्रजम् । अप्सराभ्यो ऽलङ्करणम् । एवमनुषङ्गमिच्छन्ति केचित् दा···उपकल्पनकाले तद(?)शतमिष्टका उपकल्पयितव्याः । अन्यत्सर्वं समानं स्वयमातृण्णादि ॥

Colophon:

चातुर्होत्रप्रयोगः समाप्तः ॥

Subject: Kāṭhakacayana. 1-3 citis only.

| | | | |
|---|---|---|---|
| 1 | सावित्रचयनप्रयोग: | Leaf | 1 |
| 2 | नाचिकेतप्रयोग: | ,, | 15 |
| 3 | चातुर्होत्रप्रयोग: | ,, | 25 |

Remarks:— The Ms. is in good condition. There are five Kāṭhaka citīs. (1) Sāvitra, (2) Nāciketa, (3) Cāturhotra, (4) Vaiśvasṛja, (5) Āruṇaketuka, of which the first three are dealt with in this Ms.

---

## ॥ आपस्तम्बकाठकचयनप्रयोगः ॥

## 2564. ĀPASTAMBAKĀTHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9519 g.

Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{3}{8}$ inches. Leaves—11. Lines—9 or 10 to a Page. Script—Grantha. No. of Granthas—325. Author—(?). Āruṇaketuka only—incomplete.

Beginning:

....काठकाः सावित्रनाचिकेतचातुर्होत्रवैश्वसृजाः । तथाऽरुणकेतुकः पञ्चमः काठकः ब्राह्मणे व्याख्यातः । प्रायेण तस्य प्रयोग उच्यते । स इह दे(वाचार्या)भिप्रायेणाग्निहोत्रदर्शपूर्णमासपशुबन्धचातुर्मास्यादिषु चेतव्यः । अथ पुरश्चरणम् । यजमानस्याज्याऽनुवाके यदुदीरितं तत्संवत्सरमेतद्व्रतञ्चरेदित्यादि संवत्सरं वा मासद्वयं वा द्वादशरात्रं वा अध्वर्युर्यजमानं प्रतिकारयेत् ।

पुनर्मामैत्विन्द्रियमिति तिस्रः समिधः ।
अथारुणकेतुकञ्चेष्यमाण उपकल्पयते ।

End:

वैश्रवणयज्ञो ब्राह्मणव्याख्यातो न कामस्य वा पर्वणि वैश्रवणाय यज्ञस्योत्तरवेदि....क्षु क्रतुषु चिन्वीतेति यथा ब्राह्मणन्तस्यैतस्य व्रतमिति यथा ब्राह्मण सञ्चितश्च वृत्त-समुच्चयः । आपो न बीभत्स्याद्यथा ब्राह्मणकामस्सर्वकामो वा । आपो वा इदं सर्वमिति ब्राह्मणं विज्ञायते । ब्रह्म वा आपो यदाप उपधीयन्ते ब्रह्म वै तदात्माऽध्वरे ब्रह्मण-स्सायु(ज्य)............................

Colophon : Nil.

Subject:—Kāṭhakacayanaprayoga. Fifth citi—Āruṇaketuka.

Remarks :—The Ms. is in a most decaying condition. This work closely follows the work of Tālavṛntanivāsin.

---

## ॥ आपस्तम्बकाठकचयनप्रयोगः ॥

## 2565. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 2530. Page—25. Left column.

Substance—Paper. Size —11½×6 inches. Sheets—22. Lines—10 to 11 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—(?). Āruṇaketuka only.

Beginning :

श्रीगणेशाय नमः ॥

अथारुणकेतुकस्याग्नेः प्रयोग उच्यते ।

तत्र तावत् तत्र "भद्रं कर्णेभिः" इति प्रश्नसमधीतानां मन्त्राणामारुणकेतुकेऽग्नौ विनियोजकानि बोधायनसूत्रवाक्यानि भट्टभास्करमिश्राः माधवाचार्या वर्णानुपूर्वतोऽर्थतश्च परस्परविरुद्धान्युदाहरन्ति ॥ तथा बोधायनीयकेशवस्वामी तदुभयविरुद्धमेवारुणकेतुकप्रयोगमाचष्टे । परिदृश्यमानबोधायनसूत्रे तु तत्रितयविरुद्धप्रयोगोऽवगम्यते । बोधायनाचार्यशैली च तत्र न दृश्यते । प्रत्यक्षब्राह्मणविरोधश्च तत्र तत्र बहुलमुपलभ्यते । तत्र दिङ्मात्रं प्रदर्शयामः । तत्र तावत् "स्मृतिः प्रत्यक्षम्" इत्यष्टौ दिश्याः । "शुक्रन्ते अन्यत्" इति नेति माधवीये । केशवीये परिदृश्यमानसूत्रे च दृश्यते । भट्टभास्करीये तु "अथोभयतो दर्भस्तम्बस्याष्टावुपदधाति । स्मृतिः प्रत्यक्षमिति" इत्युक्त्वा "शुक्रन्ते अन्यत्" इत्येषा ऋक् "शुक्रकृष्णे संवत्सरस्य" इत्यादि ब्राह्मणशेषत्वेन व्याख्याता । न तूपधानार्थत्वेन । तथा "आरोग" इत्यष्टौ पदशोधने(चे)शिल्पमिति चेति । माधवीये परिदृश्यमानसूत्रे च दृश्यते । भट्टभास्करीयेतु अथ दक्षिण(त) उदीचीरात्मन्युपदधाति आरोगादिभिः सप्तसूर्यनामभिरित्युक्त्वा । "कश्यपोऽष्टम" इत्यादिब्राह्मणशेषत्वेन "यत्ते शिल्पम्" इत्येषा व्याख्याता । तथा परिदृश्यमानसूत्रे पञ्चस्वपि चितिषु सञ्चितासु अग्निप्रणयनमाम्नातम् । ब्राह्मणे तु । "ब्रह्मवादिनो वदन्ति । तस्मात्प्रणेतवमग्निश्चीयत" इति

प्रश्नमवतार्य असौ भुवनेष्वनाहिताग्निरेतेति चयनानन्तरमग्निप्रणयने दोषमभिधाय 'तमभित एता अबीष्टका उपदधातीति अग्नि[ः]प्रणयनानन्तरमेव चयनमाम्नायते । तथा सूत्रकारेण वैश्रवणयज्ञस्य अन्यथाप्रयोग उक्तः स ब्राह्मणविरोधाश्रि इति नोक्त इति । भट्टभास्करीयभाष्यात् वैश्रवणयज्ञो ब्राह्मणव्याख्यात इति माधवोदाहृतस्य परिदृश्यमानसूत्रीयस्य च वचनस्याप्रामाणिकत्वमेवावगम्यते । एवमन्यत्रापि ।

एवमन्यत्रापि बहवो विरोधाः परीक्षकाणां सुस्पष्टावगम इति दिङ्मात्रमेव दर्शितम् ॥

End :

तेजस्कामो यशस्कामः तदवरुन्ध इति । एतत्प्रजापश्वादिकं स्वर्गान्तं यावत्फलमुक्तं एतावदेव लोके विमानं फलमुत्तममतो यावदुत्तममस्ति तत्सर्वमनेन च धनेन प्राप्नोति ॥ अथारुणकेतुकाग्निचितो नियमविशेषं विधत्ते । तस्यैतद्व्रतम् ॥ स्योनं तरित्या इति ।

* * * *

नियमान्तरं विधत्ते । न कूर्मस्याश्नीयात् । मेवं वेदेति । कूर्मस्याङ्गं किंचिदपि न भुञ्जीत । उदकशब्देन तत्रत्यो मीनादिरुपलक्ष्यते । तदायमस्याङ्गमाश्नीयात् य एतमारुणकेतुकमग्निं चिनुते यश्चैनं वेद तमेनं प्रत्ये दकानि । उदकवर्तीनि मीनादीनि अघातुकान्यहिंसकानि भवन्ति । आपोऽप्यघातुका उदकमरणञ्च न भवेदित्यर्थः ॥

**Colophon:**

षड्विंशोऽनुवाकः ॥

**Subject:** Kāṭhakacayanaprayoga— Fifth citi— Āruṇaketuka based on the 21 (?) to 26 Anuvākas of the first Praśna of the Taittirīyāraṇyaka.

**Remarks**:—The Ms. is in a fairly good condition. A transcribed copy of this Ms. in paper is also available in this library. See Transcript Volume No. the date of copying being T. V. No. 460. (No. 31 ?).

---

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

## 2567. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3804. Page 25. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{7}{8}$ inches. Sheets—30. Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—?. Āruṇaketuka only.

Beginning, end, colophon and subject—Same as No. 2566.

**Remarks**:—The Ms. is in a fairly good condition. On the title page is given 'राजमान्यराजे श्रीचिदम्बररायाणामिदं पुस्तकम्' i. e. the Ms. originally belongd to one Rājamānyarāja Śri Cidambararāya.

---

॥ आपस्तम्बकाठकचयनप्रयोगः ॥

## 2568. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3805. Page 25. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 4$ inches. Sheets—11. Lines— 8 to a Page. Script—Devanāgarī. No. of Granthas—210.. Author—?. Āruṇaketuka only—Incomplete.

Beginning :— Same as No 2566.

End:

तत्र प्रकारः । "आपमापम्" इति पञ्चभिः प्रतिमन्त्रं प्रतिदिशं मध्ये चोपदधाति । तया देवतं कृत्वा सूददोहसः करोति । स्वयमातृण्णादि अवद्रवणान्तश्चित्यन्तः लोकं पृणया द्वितीयाश्चितिं चिनुते स्वयमातृण्ण........स्यंतः त इन्द्रघोषास्त्वा वसुभिरिति पञ्चभिः प्रतिमन्त्रं प्रतिदिशं मध्ये उपरिष्टाच्च उपदधाति ॥

❀ ❀ ❀

ततः हिरण्यशकलप्रोक्षणादि । सर्वं सावित्रवत् । ततस्तत्कर्माणि समाप्ते अह्नि महानिशायां वा वैश्रावणयज्ञः ब्राह्मणे स्पष्टः ॥

Subject: Kāṭhakacayanaprayoga. Fifth citi—Āruṇaketuka. This Ms. contains three important sections:—

| | | | |
|---|---|---|---|
| (1) | आरुणकेतुकप्रयोगोपोद्घातः | Sheets | 1—5 |
| (2) | आरुणकेतुकप्रयोगः | ,, | 5-11 |
| (3) | आरुणकेतुकप्रयोगक्लृप्तिः (मानम्) | ,, | 11 |

Remarks :— The Ms. is in good condition. On the ittle page is given 'राजमान्यराजे श्रीचिदम्बररायाणामिदं पुस्तकम्' i. e. the Ms. originally belonged to one Rājamānyarāja Śri Cidambararāya.

---

## ॥ आपस्तम्बकाठकचयनप्रयोगः ॥

## 2569. ĀPASTAMBAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3807. Page 25. Left column.

Substance.—Paper. Size—11½×6 inches. Sheets—9. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—210. Author—(?). Āruṇaketuka only—Incomplete.

Beginning, end and subject—Same as No. 2568.

Remarks:—The Ms. is in good condition.

---

## ॥ बोधायनकाठकचयनप्रयोगः ॥

## 2570. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3801. Page 25. Right column. Substance—Paper. Size—10½×4¾ inches. Sheets—23. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Bālādīkṣita. Sāvitracayana only.

Beginning :

श्रीमहागणपतिर्जयति ।

प्रणम्य बोधायनसूत्रकारं
तदुक्तकर्माचरणाय सम्यक् ।
शिवाजिपृथ्वीपतिबोधितोऽहं
करोमि बालाध्वरकृत्प्रयोगम् ॥

सावित्रं स्वर्गकामश्चिन्वीत । पशुबन्धेचेच्चीयते चेष्यमाण उपकल्पयते पञ्चाशीतिशतं हिरण्येष्टकाः शर्करा वा घृताक्तास्तावत्यो लोकम्पृणाः अपरिमिता वा चतस्रः स्वयमातृण्णाः सहस्रं हिरण्यशुल्कान् * पाशुकांश्च सम्भारान् । अथामावास्येन वा हविषेष्ट्वा नक्षत्रे वा पूर्वेद्युः करिष्यमा-

णस्य कर्मणोऽविघ्नेन परिसमाप्त्यर्थमादौ श्रीमहागण-
पतिपूजां करिष्ये इति सङ्कल्प्य

* * * *

ममोपात्त० परमेश्वरप्रीत्यर्थं सकाठकाग्निना निरूढप-
शुना यक्ष्ये । तन्म ऋध्यतां० तत्त ऋध्यतां० ॐ तथेति
ऋत्विजो वृणीते ॥

End:

अध्वर्यो धेनुमृषभमनड्वाहमन्विष्टकं दक्षिणाश्च ददाति
तूष्णीं प्रतिगृह्णाति । अग्नीदौपयजानङ्गारानित्यादि पशु-
कर्म प्रतिपद्यते० ब्राह्मणतर्पणान्तं समानम् । सन्तिष्ठते
सावित्रः ॥

**Colophon:**

इति बोधायनसावित्रचयनप्रयोगः सम्पूर्णः ॥

Subject: Kāṭhakacayanaprayoga, First citi—Sāvitra only.

**Remarks**:—The Ms. is in good condition.

---

## ॥ बोधायनकाठकचयनप्रयोगः ॥

## 2571. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3802. Page 25, Right column.

**Substance**—Paper. Size—$10\frac{3}{4} \times 4\frac{3}{4}$ inches. Sheets—25. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Bālādikṣita. Sāvitracayana only.

Beginning, end, colophon and subject—Same as No. 2570.

**Remarks**:—The Ms. is in good condition.

---

## ॥ बोधायनकाठकचयनप्रयोगः ॥

## 2572. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 3803. Page 25. Right column. Substance—Paper. Size—10⅞×4¾ inches. Sheets—23. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Bālādīkṣita. Sāvītracayana only.

Beginning, end, colophon and subject—Same as No. 2570.

Remarks:—The Ms. is in good condition.

---

## ॥ बोधायनकाठकचयनप्रयोगः ॥

## 2573. BODHĀYANAKĀṬHAKACAYANA-PRAYOGAḤ.

Burnell's Catalogue No. 9177. Substance—Palm Leaf. Size—17×1⅛ inches. Leaves—15. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—360. Author—(?). Vaiśvasṛjacayana and Samaṣṭicayana only.

Beginning:

वैश्वसृजचयनप्रयोगः ॥

एतेनवैश्वसृजो व्याख्यातः । वैश्वसृज इत्यग्निचित्यस्य नामधेयम् । विश्वसृड्भिश्चितोऽग्निः वैश्वसृजः । "आदर्शमग्निं चिन्वानाः पूर्वे विश्वसृजो मृताः" इति मन्त्रवर्णात् । एतेनसावित्रेण वैश्वसृजो व्याख्यातः । पशुबन्धे चीयते प्रावृषि पौर्णमास्याममावस्यायां वैन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये इति सङ्कल्प्यारण्योरग्निं समारोप्य

यागदेशं गत्वायतनानि कल्पयित्वा अग्निं मथित्वा आयतने निधाययोपावरोह्य । विधुत् । अथ चयनसङ्कल्पः । दर्भेष्वासीनः दर्भान् धारयमाणः + परमेश्वरप्रीत्यर्थं वैश्वसृजमग्निं चेष्य इति सङ्कल्प्य चेष्यमाण उपकल्पयते ।

End:

"भूरग्निम्" इत्यादिश्चतस्रः स्वयमातृण्णा उपधाय लोकं पृणाभिः प्रच्छाद्य चत्वालात्पुरीषमाहृत्य "पृष्ठोदिवि" इति वैश्वानर्यर्चा चितावनुव्यूहति । "भूर्भुवस्सुवः" इत्यनुवाकेनानुशंसनमग्निप्रणयनादि । सा चितिर्भवति । चातुर्होत्रः पञ्चमीचितिः । अवरोहणजपादिदक्षिणाकालो उभयीर्दक्षिणा ददाति । ऋतुदक्षिणा अग्निदक्षिणाश्च । पूर्ववत् दक्षिणा प्रतिग्रहः । अन्यत्सर्वं समानम् ब्राह्मणतर्पणान्तम् ॥

Colophon:

समष्टिचयनप्रयोगः समाप्तः ॥

Subject: Kāṭhakacayanaprayoga, consists of

| | | |
|---|---|---|
| (a) Vaiśvasṛjacayana. | Leaves | 1—13 |
| (b) Samaṣṭicayana. | ,, | 14—15 |

Remarks:—The Ms. is in a very good condition. Dr. Burnell put this No. in the 'Errata et addenda' under the heading 'fragments on prayoga.

---

## ॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

## 2574. ĀSVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No. 11. Substance—Paper. Size—9½ × 4¼

inches. Sheets—89. Lines—19 to a Page. Script—Devanāgarī. No. of Granthas—2475. Author—Tālavṛntanivāsin. Pūrvaṣaṭka only.

Beginning:

श्रीगणेशाय नमः ॥

समस्तप्राणिजातस्य हृत्पद्मनिलयस्थितम् ।
वेदार्थविदुषां ज्ञेयं यज्ञात्मानं नमाम्यहम् ॥

देवस्वामिसिद्धान्तिनारायणादिव्याख्याकारानुसारेणाश्वलायनसूत्रस्यादित आरभ्य प्रयोगवृत्तिः क्रियते । अनादेशे होत्रा कर्तव्याः पा(प)दार्थाः । अस्मिञ्छास्त्रे स होता सूत्रोक्तर्त्विग्लक्षणसहितः यज्ञोपवीती शुचिश्च भवति । कर्मार्थे ऋचं पादा(द)ग्रहणे सूक्तं सूक्तादौ हीने पादे अधिके तृचं एतदपि सामान्यं जपानुमन्त्रणाप्यायनोपस्थानान्युपांशु मन्त्राश्च कर्मकारणाः । अथ कर्मक्रमः । होतरेहीत्युक्तो होता प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीती भूत्वाचम्य तीर्थेन दक्षिणाद्भूत्वाहवनीयोत्करयोरन्तरा (पूर्वेणोत्करावपरेण प्रणीता इध्ममपरेणाप्रणीते कर्माणि चात्वालवत्सु कर्मसु चात्वालमपरेण गत्वा उत्तरया) वेदिश्रोण्या अपरेण तिष्ठन् "अग्नये समिध्यमानायानुब्रूहि" इत्युक्तो जपति ॥

End:

माध्यन्दिने मरुत्वतीयप्रगाथानन्तरमाहूय एकस्य चिन्म इति सूत्रमुखीयांशस्त्वा इन्द्रमरुत्व इति तिस्रः स-

निवित्कं शस्त्वा अन्त्यया परिधानीया ॥ निष्केवल्यस्य सामप्रगाथान्तमाविष्कृतं शस्त्वाहूय "एकं तुत्वा" इति सूक्तमुखीयां शस्त्वाहूय "नृणामुत्वा" इति तृचं एकां शस्त्वा-निवित् अन्त्या परिधानीया ॥ मैत्रावरुणस्य सर्वं बृहस्पति-सववत् ॥ अथ ब्राह्मणाच्छंसिनः आयन्त इव सूर्यं बण्महाँ असि सूर्येति स्तोत्रीयानुरूपौ ॥ शंसावोमुदुत्येमधुमत्तमा इत्यादि सर्वं बृहस्पतिसववत् ॥ अथाच्छावाकस्य सर्वं बृहस्पतिसववत् ॥ केचिदत्रापि ब्राह्मणाच्छंसिनः एक-स्तोत्रीयानुरूपैवेति वदन्ति । स्तोत्रीयानुरूपाः सर्वास्तृचा एवेति वदन्ति अपरे ॥ तृतीयसवनं सर्वं बृहस्पति-सवेन व्याख्यातम् ॥ एकत्रिकः समाप्तः ॥

हरिः ॐ ॥

Colophon: (Sheets. 25)

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।

कृता वैविधवृद्धेन तालवृन्तनिवासिना ॥

चातुर्मास्यानि समाप्तानि ॥

आश्वलायनसूत्रस्योपरितन(?)षट्कं समाप्तम् ॥ श्रीकृष्णार्पणमस्तु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥ श्रीः ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।

यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥

Subject: Āśvalāyanaśrautaprayogavṛtti—an independent Prayoga treatise on the Āśvalāyanaśrautasūtra 1—6 Adhyāyas.

This Ms. contains the following sections:

| Serial No. | Subject. | Sheets | Serial No. | Subject | Sheets |
|---|---|---|---|---|---|
| 1 | दर्शपूर्णमासहौत्रम् | 1 | 11 | सौत्रामणी | 33 |
| 2 | अग्न्याधेयम् | 6 | 12 | सोमप्रयोगः | 42 |
| 3 | अग्निहोत्रम् | 9 | 13 | माध्यन्दिनसवनम् | 60 |
| 4 | पिण्डपितृयज्ञः | 11 | 14 | तृतीयसवनम् | 64 |
| 5 | अन्वारम्भणीयम् | 12 | 15 | उदयनीयेष्टिः | 69 |
| 6 | पुनराधेयम् | 13 | 16 | षोडशीसंस्था | 70 |
| 7 | आग्रयणम् | 14 | 17 | अतिरात्रप्रयोगः | 78 |
| 8 | काम्येष्टयः | 14 | 18 | पुनस्तोमः | 84—85 |
| 9 | चातुर्मास्यम् | 20 | 19 | बृहस्पतिसवः | 85—87 |
| 10 | पशुबन्धः | 25 | 20 | एकाहिकः | 87—88 |

Remarks:—The Ms. is in good condition. The author of this work is Āṇḍapillayār otherwise known as Tālavṛntanivāsin. He is unrivalled in vedic scholarship, which he has made a fair display in his prayoga work. He is no doubt later than Devasvāmin, Siddhāntin, Nārāyaṇa and others, whom he abundantly quotes in his work. On the title page is given 'गङ्गाधरनायकानामिदं पुस्तकम्' i.e., the Ms. belonged to Gaṅgādharanāyaka.

---

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

## 2575. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 4071. Page 14. Left column.

Substance—Paper. Size—$10\frac{5}{8} \times 5\frac{7}{8}$ inches. Sheets—82. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Tālavṛntanivāsin. First Five Adhyāyas—incomplete.

Beginning—Same as No. 2574.

End :

एषा परिधानीया सर्वशस्त्रपरिधानीया स्वाहा वोनित्यः। उक्थम् । वाचि "घोषाय त्वा" इति शस्त्वा जपति । षट्पदे-त्रिपदे वा । प्रतिगरे विशेषः । ओथा मो दैवोमिति व्यत्यासेन । शेषं यथा प्रकृति । "अग्न इन्द्रश्च दाशुषो दुरोण" इति याज्यानवानम्(?) । अनुवषट्कारश्च । द्विर्वा-गोजः । अथाहृतमुक्थ पात्रमध्वर्युणा भक्षयत्यध्वर्योरुपहव-मिष्ट्वा भक्षयति ॥

**Colophon:** (sheet No. 36)

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यवृद्धेन तालवृन्तनिवासिना ॥
समाप्तानि चातुर्मास्यानि ॥

Subject: Āśvalāyanaśrautaprayogavṛtti. 1—5 Adhyāyas.

This Ms. contains the following:

| Serial No. | Subject | Sheets | Serial No. | Subject | Sheets |
|---|---|---|---|---|---|
| 1 | दर्शपूर्णमासौ | 1 | m | वर्षकाम्येष्टिः (कारीरेष्टिः) | 24 |
| 2 | आधानम् | 8 | n | तुरायणम् | 24 |
| 3 | अग्निहोत्रम् | 11 | o | दाक्षायणम् | 25 |
| 4 | प्रवासहोमः | 14 | p | द्यावापृथिव्ययनम् | ,, |

| Serial No. | Subject | Sheets | Serial No. | Subject | Sheets |
|---|---|---|---|---|---|
| 5 | पिण्डपितृयज्ञः | 16 | q | यज्ञविभ्रष्टेष्टिः | 26 |
| 6 | अन्वारम्भणीयम् | 17 | r | सोमतनेष्टिः | ,, |
| 7 | उत्सर्गेष्टिः | 18 | s | हिरण्यनाशेष्टिः | ,, |
| 8 | पुनराधेयम् | 18 | t | अभ्युदयेष्टिः | ,, |
| 9 | आग्रयणम् | 20 | 11 | चातुर्मास्यम् | 26 |
| 10 | काम्येष्टयः | ,, | 12 | वैश्वदेवः | ,, |
| a | आयुष्कामेष्टयः | ,, | 13 | पशुबन्धः | 36 |
| b | स्वस्त्ययनेष्टिः | 21 | 14 | पश्वेकादशिनी | 41 |
| c | पुत्रकामेष्टिः | ,, | 15 | सौत्रामणी | 44 |
| d | उत्तरेष्टिः | ,, | 16 | हविर्यज्ञप्रायश्चित्तम् | |
| e | वित्तकामेष्टिः | ,, | | (विष्यपराधप्रायश्चित्तम ) | 46 |
| f | उत्तरालोकेष्टिः | ,, | a | हविर्विषयप्रायश्चित्तम् | ,, |
| g | उत्तरामित्रबन्देष्टिः | ,, | b | अग्निहोत्रकालातिक्रमप्रायश्चि- | |
| h | स्नुषाश्वशुरीयेष्टिः | 22 | | त्तम् | 52 |
| i | भेदकामेष्टिः | ,, | c | कर्तृविषयप्रायश्चित्तम | 53 |
| j | सम्पत्तिकामेष्टिः | ,, | d | अग्निविच्छेदप्रायश्चित्तम् | ,, |
| k | शत्र्वभिभूयमानेष्टिः | ,, | e | विपर्यासप्रायश्चित्तम | |
| l | पवित्रेष्टिः | 28 | 17 | अग्निष्टोमप्रयोगः | 59 |

Remarks :—The Ms. is in very good condition. This Ms. abruptly ends in the middle of the Agniṣṭomaprayoga (5th Adhyāya). The name of the author of this work as given on the side margin of this Ms. is Viṣṇugūḍha which might have misled Dr. Burnell to ascribe it wholly to one Viṣṇu or Viṣṇuugūḍha

bhaṭṭa. Evidently Viṣṇugūḍhabhaṭṭa is the author of the Uttaraṣaṭkaprayoga. See No. 2578.

---

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

## 2576. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 9110 c. Substance—Palm Leaf. Size—16½ × 1½ inches. Leaves—11 (40—50). Lines—8 to a page. Script—Telugu. No. of Granthas—300. Author—Tālavṛntanivāsin. Śrautaprāyaścitta only.

Beginning:

अथ हविर्यज्ञप्रायश्चित्तान्युच्यन्ते ।

विष्ण्वपराधे प्रायश्चित्तिरित्यादिनोक्तानि विहितपदार्थेनामन्यथाकरणे प्रायश्चित्तम् । श्लिष्टाभावे प्रतिनिधिः श्रुतद्रव्यापचारे प्रतिनिधिना कर्तव्यं सदृशेनाप्रतिषिद्धेन । अन्याभावे पशुप्रसवेन दध्ना पयसा वा तैलादिना उक्ताः शर्करा इत्यत्र । एवं सिद्धान्तिनो मतिः । अन्वाहिताग्नेः प्रयाणोपपत्तौ अस्मिन् देशे वसनाशक्त्या पृथक् स तेषु भाण्डेषु समोप्य पुरुषाः प्रत्यक्षमेव हरेयुः । अथवा "तुभ्यं ता आङ्गिरस्तम" इत्येतयर्चा आहवनीये चतसृन् पात्रमाज्यं प्रत्यगुदग्देशे स्थित्वा हुत्वा पृथगरणीषु आरण्यौ पृथग्वा सकृद्वा । "अयं ते योनिर्ऋत्वियः" इत्येतयर्चा समारोपयते ॥

End:

अग्निहोत्रहोमद्वययोरन्तराळे आहवनीयानुगतौ हि-

रण्यं प्रतिनिधिमुपादाय तद्धिरण्यमाहवनीयाय तस्मिन्नि-
धाय तस्मिन् हिरण्यमुत्तरमाहुतिं जुहुयात् वाचनिकोऽयं
प्रतिनिधिः ॥ देशान्तर उक्तं प्रायश्चित्तमुच्यते । अग्नि-
होत्रहोमे "मनो ज्योतिः" इत्याहवनीये जुहुयात् प्रतिहोमं
कुर्यात् ॥

Colophon :

प्रायश्चित्तानि समाप्तानि ॥

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यवृद्धेन तालवृन्तनिवासिना ॥

Subject :

| | | | |
|---|---|---|---|
| .. ...प्रायश्चित्तानि | Leaf | No. | 42 |
| साम्नाय्यदोषप्रायश्चित्तानि | ,, | ,, | ,, |
| साम्नाय्यहविष्यन्दनप्रायश्चित्तम् | ,, | ,, | ,, |
| सायंदोषदुष्टप्रायश्चित्तम् | ,, | ,, | ,, |
| प्रातर्दोषदुष्टप्रायश्चित्तम् | ,, | ,, | ,, |
| वत्सपानदुष्टप्रायश्चित्तम् | ,, | ,, | ,, |
| स्थालीस्रावे गोरुपवेशने प्रा० | ,, | ,, | ,, |
| गोर्वाश्वेतशोणितदोहे प्रा० | ,, | ,, | ,, |
| स्कन्नसेकयोः प्रा० | ,, | ,, | 43 |
| पर्यस्कन्ने प्रा० | ,, | ,, | ,, |
| अप्रहाणाग्निहोत्रशब्दे प्रा० | ,, | ,, | ,, |
| अग्निहोत्रविष्यन्दने प्रा० | ,, | ,, | 43 |
| केशाहिसंसर्गे प्रा० | ,, | ,, | ,, |
| उत्तराहुतिस्कन्ने प्रा० | ,, | ,, | ,, |

| | | | |
|---|---|---|---|
| सायङ्कालातिक्रमप्रायश्चित्तम् | Leaf | No. | 44 |
| अश्रुपाते प्रा० | ,, | ,, | 45 |
| सायङ्कालाप्रणयने प्रा० | ,, | ,, | ,, |
| प्रातरप्रणयने प्रा० | ,, | ,, | ,, |
| गार्हपत्यानुगमप्रायश्चित्तम् | ,, | ,, | ,, |
| प्रणयनानन्तरमाहवनीयानुगमनप्रायश्चित्तम् | ,, | ,, | 46 |
| समारूढप्रवणनाशे प्रा० | ,, | ,, | ,, |
| युगपदनुगमने प्रा० | ,, | ,, | ,, |
| समारूढारणीनाशे प्रा० | ,, | ,, | 47 |
| गृहदाहे प्रा० | ,, | ,, | ,, |
| अग्निसंसर्गे प्रा० | ,, | ,, | ,, |
| गार्हपत्याहवनीययोरविवेके प्रा० | ,, | ,, | ,, |
| मृतिशब्दे प्रा० | | | |
| यवजनने प्रा० | | | |
| अमावास्यानागतपरीष्टिप्रारम्भे प्रा० | ,, | ,, | 48 |
| पूर्णाहुतिः | | | |
| अग्नेरन्यत्राहुतिहवने प्रा० | ,, | ,, | ,, |
| विपर्यासप्रायश्चित्तम् | ,, | ,, | ,, |
| आवहनविस्मृतौ प्रा० | ,, | ,, | ,, |
| कृत्स्नदग्धे प्रा० | ,, | ,, | ,, |
| आवाहनात्प्राक्हविर्दोषे प्रा० | ,, | ,, | ,, |
| आवाहनानन्तरं हविर्दोषेप्रा० | ,, | ,, | ,, |
| ........भेदे प्रा० | ,, | ,, | ,, |

Remarks: —The Ms. is in good condition. For the other works contained herein see the list under Remarks on No. 2099.

---

## ॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

## 2577. ĀŚVALAYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 4059. **Page** 27. Right column. **Substance**—Paper. Size—$10\frac{5}{8} \times 5\frac{1}{4}$ **inches.** Sheets—2. Lines—16 or 17 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Tālavṛntanivāsin. Śrautaprāyaścitta—a fragment only.

Beginning:

... इन्द्रवृत्रघ्नानन्तरं यद्वाग्वदन्तीति षदसूक्तोक्ता वाग्देवत्याः पशुरस्ति काण्डे तैत्तिरीये । ❀ ❀ अवीवृधतेति एतानि पदानि देवतावाचीन्युपांशु प्रयोक्तव्यानि ॥ इति पशुतन्त्रं समाप्तम् ॥ सौत्रामण्याः कर्म । तत्राश्विनसारस्वतैन्द्राः पशवः बार्हस्पत्यो वा विकल्पेन । तेषां पाश्विष्ट्यादि संस्थाजपान्तम् ॥

End:

"मित्रावरुणयोः प्रिया धामान्ययाड्देवानाम्" इत्यादि "मित्रावरुणाविदं हविरजुषेतां देवा आज्यपाः" इत्यादि शंयुवाकान्ते वाजिनचर्या । शन्नो भवन्तु । वाजे वाजे । वाजिनस्याग्नेवीहीत्यनुवषट्कारः ॥ समाप्ता सौत्रामणी पयस्या च ॥ अथ हविर्यज्ञप्रायश्चित्तान्युच्यन्ते । विध्यपराधे प्रायश्चित्तिरित्यादिनोक्तानि । विहितपदार्थानाम-

करणेन्यथाकरणेचानन्तरंप्रायश्चित्तम् । शिष्टाभावे प्रति-
निधिः श्रुतिद्रव्यापचारे प्रतिनिधिना कर्तव्यं सुसदृशेन प्र-
तिषिद्धेन आज्याभावे पशुप्रभवे ...

**Colophon:**

समाप्ता सौत्रामणी पयस्या च ॥

Subject: Āśvalāyanaśrautaprayogavṛtti based on 8—10 Khaṇḍas of the third Adhyāya of the **Āśvalāyanaśrautasūtras.**

**Remarks:**—The Ms. is in good condition.

---

## ॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

## 2578. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

J. L. Collection No. 254. Substance—Paper. Size—10 × 4¾ **inches.** Sheets—118 (25 to 30 107 and 108 are missing). Lines—10 to a Page. Script—Devanāgarī. No. of **Granthas**—2675. Author—Viṣṇu (gūḍha) bhaṭṭa. Uttaraṣaṭka only.

Beginning:

श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्तिगुरवे नमः ॥

शुक्लाम्बरधरं विष्णुं + उपशान्तये ॥

श्रीगुरुभ्यो नमः ॥

आश्वलायनसूत्रस्योपरितनषट्कस्य देवस्वाम्यादि-
व्याख्याकारानुसारेण प्रयोग उच्यते । सत्राणामुक्तदीक्षोप-
सदइत्यारभ्य दीक्षोपसद उक्ताः । पूर्वमेव सत्राणां सामा-
न्येन अस्मिन्नुक्ता इत्यनुवादो गवामयनार्थम् । प्रथमं

गवामयनमुच्यते । प्रायणीयोऽतिरात्रः प्रथममहः पूर्वषट्के विस्तरेणोक्तमुदयनीयोऽप्येषः । एवं कथं गम्यते । अयमेकैकाहोऽतिरात्रइत्यारभ्यादौ प्रायणीय एषोऽन्त्य उदयनीय इति वचनात् । महाव्रतं तु 'महाव्रतस्य पञ्चविंशतिम' इत्यारभ्य आरण्यकैस्त्रिभिरध्यायैरुपादिष्टम् ॥ इतराण्यहानि सप्तमाष्टमाभ्यामुक्तानि । एवं सर्वेषामह्नां क्लृप्तिः ॥

End:

सर्वतोमुखेऽनेकधर्मविधानात् कामेऽप्यैकादशिनी प्राप्तीच्छन्ति । आग्नेयैन्द्रौ सविता च यथासंख्यं केचित्कापेयाः सर्वा आलब्धव्याः । तदा याज्यानुवाक्याः पशुप्रकरणे द्रष्टव्याः । केचिदाश्वलायनक्रतुपशव एवेच्छन्ति । सर्वतोमुखः समाप्तः सर्वतो मुखः ।

Colophon:

इति श्रीआश्वलायनसूत्रप्रयोगवृत्त्यां विष्णुभट्टकृतायां सर्वतोमुख समाप्तः ॥ हरिः ॐ ॥ शुभमस्तु ॥ नमः शौनकाय नमः शौनकाय ॥ ॐ सरस्वत्यै नमः ॥ श्रीदक्षिणामूर्तिगुरवे नमः ॥ करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

(Sheet 76) इति देवस्वामिप्रसादकृतौ विष्णुगूढभट्टोपाध्यायगूढविरचिते आश्वलायनप्रयोगबन्धौ आरण्यके प्रथमोऽध्यायः ॥

Subject : Āśvalāyanaśrautasūtraprayogavṛtti, based on 7-12 Adhyāyas of Āśvalāyanaśrautasūtras. This Ms. contains the following important sections —

| | | Sheets | | | Sheets |
|---|---|---|---|---|---|
| 1 | गवामयनम् | 1 | 7 | ऋक्कृच्छ: | 36 to 42 |
| 2 | चतुर्विंशमह: | 4 | 8 | अभिजित | 47 |
| 3 | अभिप्लवषळह: | 7 | 9 | विश्वजित् | 54 |
| 4 | पृष्ठ्यषळह: | 15 | 10 | दशरात्रम् | 71 |
| 5 | महाबालभित् | 33 | 11 | महाव्रतम् | 71 |
| 6 | पञ्च: | 33 to 36 | 12 | एकादशाहीनम् | 100 |
| | | | 13 | सर्वतोमुखम् | (?) to 118 |

Remarks :—The Ms. is in good condition. According to the two colophons given above, the authorship of this commentary on the Uttaraṣaṭka is attributed to one Viṣṇugūḍhabhaṭṭācārya, perhaps a disciple of Devasvāmin, the famous commentator of Āśvalāyanaśrautasūtras. On the first and last pages of this Ms. the following is given— "आश्वलायनसूत्रं विष्णुगूढं (दीर्घं) उत्तरषट्कं, गङ्गाधरनायकस्येदं पुस्तकम्" i. e. the Ms. belonged originally to one Gaṅgādhara Nāyaka.

---

॥ आश्वलायनश्रौतप्रयोगवृत्तिः ॥

## 2579. ĀŚVALĀYANAŚRAUTAPRAYOGA-VṚTTIḤ.

Burnell's Catalogue No. 9132. Page 14. Left column. Substance—Palm Leaf. Size —16½ × 1½ inches. Leaves—153. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—5150. Authors—Tālavṛntanivāsin and Viṣṇugūḍhabhaṭṭa. Complete.

Beginning:— Same as No. 2574,

End—Same as No. 2578.

Colophon:—(Leaf No. 64)

एकत्रिक: समाप्त (प्त:) हरि: ॐ ॥ शुभमस्तु ॥

गुरुभ्यो नम: ॥ शिवाय परमगुरवे नम: ॥

आश्वलायनम् । आपस्तम्बं । ரங்கநாதபுரத்திலிருக்கும் சேஷாவதானி स्वहस्तलिखितम् ॥ श्री कृष्णो रक्षतु । शुभमस्तु ॥

Subject: Same as Nos. 2574 & 2578.

Remarks:—The Ms. is in decaying condition. Dr. Burnell observes that this Ms. might have been written about 1650 A. D. The scribe of this Ms. is one Śeṣāvadhānin of Raṅganāthapura.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2580. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

J. L. Collection No. 255. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—181. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4400. Author—Tālavṛntanivasin. First nine Praśnas.

Beginning:

॥ श्रीमहागुरुभ्यो नमः ॥

गङ्गाप्रवाहपरिपूतजटाकलाप-
क्रीडत्फणीन्द्रचकितेन्दुमणिप्रभाभिः ।
प्रज्वालितस्फुरिततक्षकहारबन्ध-
प्रच्छन्नकालविषकण्ठहरं नमामि ॥

आपस्तम्बीयसूत्रस्य धूर्तस्वामिव्याख्यानुसारेण शाखा-

न्तरसिद्धानपेक्षितानविरुद्धानप्युपसंहृत्य दर्शपूर्णमासा-वारभ्याग्निचयनपर्यन्तानां कर्मणां प्रयोगवृत्तिः क्रियते। सोमान्तानित्यान्य फलार्थिनापि कर्तव्यानि "नैयमिकं ह्येतदृणसंस्तुतम्" इति वसिष्ठवचनात् सर्वाङ्गोपसंहारे असमर्थस्यापि कर्तव्यानि अनधीतस्यापि साधोः कर्तव्यानि दर्शपूर्णमाससत्रादौ कालविशेषगोचरौ चिनौ तयोः कालविशेषयोराग्नेयादयः क्रियते लक्षणया कर्मणि प्रवृत्तिः "काले मुख्यः कर्मणि लक्षणा" इति सूत्रकाराणां मतम्। मीमांसकानां विपर्यासेन यस्मिन्नहनि मध्यन्दिनात्पूर्वं पौर्णमासी समा वा तदा पूर्वेद्युरुपक्रमः सद्यो वा एवं सत्यमावास्या चेन्मध्यंदिनात्पूर्वं समाप्यते समा वा तदा पूर्वेद्युरेव यदा तु मध्यंदिनात्परतस्तदा तस्मिन्नेवाहन्युपक्रमः उत्तरेद्युरिज्या ॥

End:

सर्वप्रायश्चित्ते कृते पश्चान्म्रियतेः भूर्भुवः सुवरित्याहवनीयः स्वतन्त्रेषु सर्वप्रायश्चित्तं जैमिनीनां ब्राह्मण उक्तम्।

एषात्रैविद्यवृद्धेन तालवृन्तनिवासिना।
सोमपेन कृतावृत्तिः प्रयोगस्य प्रदीपिका॥

तत्र श्लोकः।

उदुत्तिष्ठ इत्यादौ द्विबहुष्वेव नोह्यतेः।
उच्छागतिष्ठ इत्यादौ द्विबहुष्वेव नोह्यते॥

* * *

मन्त्रेण गर्भष्टोपं च मसनोपसमूह्य च।
एतं युवानमंत्रेण वानस्पत्यादिपाशुकम्॥

यूपे विरूढे प्राप्ते च यस्मिन्यस्य पशोः क्रियाः ।
तत्र त्वाष्ट्र उपालभ्यो गणेनात्र यथाविधि ॥

Colophon:

समाप्तं प्रायश्चित्तम् ॥ शुभमस्तु ॥
देवळे रामस्येदं पुस्तकम् ॥

Subject: Āpastambaśrautaprayogadīpikā, a popular Śrautaprayoga treatise based on the 1—9 Praśnas of the Āpastambaśrautasūtras of the Black yajur-Veda.

Remarks:—The Ms. is in a fairly good condition. The Ms. originally belonged to Devale Rāma.

---

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2581. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9163. Page 18. Left column. Substance—Palm Leaf. Size—16×1½ inches. Leaves—214 (1-214). Lines—9 to a Page. Script—Grantha. No. of Granthas—8500. Author—Tālavṛntanivāsin. First fifteen Praśnas—Incomplete.

Beginning—Same as No. 2580.

End:

(मरुतश्च मन्त्राः सा)मानि च अस्य नित्यो होमः । एवं हुत्वा यथेष्टगमनम् । अभिचरतो दशहो(?)ग्नीध्रीये आहिताग्निरसोमयाजीयः (परं सोमेन वा यजेत ।) तस्य नैमित्तिकं परिभक्षकर्म स सोमयाजिनोवापि याजयितुर्नैमित्तिकमिति शाण्डिल्यमतिः । यज्ञं समाप्य परिभक्षं

क(र्म करिष्य इति सङ्कल्प्य । अग्नी)न्विहृत्यापां पुष्पमि-
ति जुहोति त्रिभिर्मन्त्रैः । अग्निरिन्द्रो विश्वेदेवा देवता ।
हुत्वा हुत्वाज्यशेषमन्यत्र निनयति (वयं सोमव्रते तवेति
भक्षयन्ति शेषम् । अन्यमाज्यमानीय दक्षिणाग्नौ प्रतिमन्त्रं
जुहोति ॥)

Colophon:—(Leaf 65).

चातुर्मास्यहौत्रं समाप्तम् ॥

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

ரங்கநாதபுரத்தில் வேங்கடராயரு வாக்கு
சேஷரு ஹஸ்தலிகிதம்.

Subject: Āpastambaśrautasūtraprayogadīpikā based on the 1—15 Praśnas of the Āpastambaśrautasūtras of the Black Yajur-Veda.

Remarks:—The Ms. is in a decaying condition. Many leaves in the beginning are eaten away by rats. The scribe is one Śeṣa, son of Veṅkaṭarāya of Raṅganāthapura. At the begining of this Ms. there are nearly 20 fully damaged leaves which contain extracts from Bodhāyana Aptoryāma, Cāturmāsya and Paśubandha prayogas.

---

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2582. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9136. Page 18. Left column.

Substance—Palm leaf. Size—15⅞ × 1¼ inches. Leaves—81 (83—163). Lines—7 or 8 to a Page. Script—Grantha. No.

of Granthas—2200. Author—Tālavṛntanivāsin. Third fourth, fifth and sixth Praśnas Incomplete.

Beginning:

वर्तमानसामीप्य उक्त इत्यर्थः। समाप्तेः प्रैषप्रार्थनायां समाप्तायामनुज्ञानं युक्तम् । प्रणवाद्युच्चैर्याजुर्वेदिकत्वात् । प्रणवात्पूर्वेषु..................यनार्थत्वात् प्रणवादिप्रसव उच्चैः "ॐमिति ब्रह्मा प्रसौति" इत्युक्तेऽपि न केवलं प्रणवमात्र प्रसवः।' 'यज्ञेषु चैतदादयः प्रसव' इति स्मरणात् ..............स्मिन्कर्मण्यामन्त्रयतेऽध्वर्युः प्रोक्षिष्यामि परिग्रहीष्यामीत्यादि तेषु प्रतिवचनम् ॥

End:

द्विशब्दोपादानमेवम्प्रयोजनवादिति इहैकवद्वादित्युपस्थानान्ते तृणापचयनं यजमानस्येति उपस्थायाग्नेस्तृणान्यपचिनोतीति समानकर्तृत्वावगतेर्यत्करोत्युपस्थानं वात्सप्राद्यपि तस्यान्ते तृणापचयो तथा सायमप्युपस्थानान्ते उपदेशत प्रात एवेति तदानन्तर्यात् । पूर्वत्र चानुपदेशादन्यत्राध्वर्युणा शोधनैः सहेति प्रातरनेकाद्यन्यप्रयोगेषु नोपस्थानान्ते तृणापचयनम् । तदा उपरितनशोधनं काले तृणानाम्परिसमूहनमित्युपदेशः । तैरेव तृणैः पुनः पुनः परिस्तरणम् । अपचयस्यार्थवत्वायेति दृष्टार्थत्वा ॥

Colophon (Leaf 43).

इत्यष्टमः पटलः पञ्चमः प्रश्नः ॥

Subject: Āpastambaśrautaprayoga Dīpikā, based on 3—6 Praśnas of the Āpastambaśrautasūtras of the black Yajurveda.

Remarks:—The Ms. abruptly begins in the middle of the sixth

Paṭala of the third Praśna and breaks off in the middle of the sixth Paṭala of the sixth Praśna. The Ms. is in a fairly good condition. At the end of this Ms. there are three leaves containing some Ślokas from Kāvyas.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2583. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9180. Page 18. Left column. Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—67. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1000. Author—Tālavṛntanivāsin. Ninth Praśna only.

Beginning:

अथ प्रायश्चित्तान्युच्यन्ते ॥ 'श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते' इति श्रुतौ लक्षणमात्रमेव चिह्नमात्रमेव यस्य प्रायश्चित्तस्योपदिश्यते त[त]च्छ्रुतिलक्षणं। तस्माद्यस्य हविः क्षायतीत्यत्र द्वयोर्बहूनां वा क्षाणे प्रायश्चित्तं नैकस्यैव हविषः। एवं यद्यष्टापदीत्यत्र द्वादशपद्यां षोडशपद्यामपि प्रायश्चित्तम्। विध्यपराधे विधीयते विधेरपराधो विध्यपराधः। अपराधोऽन्यथा क्रिया। तस्मिन् विध्यपराधे प्रायश्चित्तं विधीयते। यस्यानो वा रथो वान्तराग्नीयात्याहवनीयमुद्राप्य गार्हपत्यादुद्धरेदिति प्रायश्चित्तरथादीनामन्तरागमने अत्र रथादीनामन्तरागमनविधानं यथा रथादीनां दक्षिणार्थं नयते तत्र प्रायश्चित्तं

विहितत्वात् । यागार्थगमने च न प्रायश्चित्तम् । अथवा 'श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते' इति न स्मृतिलक्षणमित्येवं सूत्रार्थः । तत्रैवं फलम् । ब्रह्मौदनार्थमौपासनस्सर्व आहितः । पाकात्पूर्वमनुगच्छेत्तदौपासनानुगमनप्रायश्चित्तं भवति । उत्पत्तिस्त्वौपासने विहितैव स्मृतिप्राप्तमयाश्चाग्ने ब्रह्मौदनपाकादूर्ध्वमनुगच्छेदुत्पत्तिस्त्वौपासन विहिता । मथित्वा वा यदि प्रयायादिति । प्रायश्चित्तं नात्र स्मृतिप्राप्तमयाश्चाग्ने पाकादूर्ध्वं । पुनरेव पाकः । तस्माच्छ्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयते । न स्मृतिलक्षणमिति ।

End—Same as No. 2580.

**Colophon:**

पञ्चमः पटलः ॥ इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां प्रयोगदीपिकायां हविर्यज्ञस्य प्रायश्चित्तानि समाप्तानि हरिः ॐ ॥ शुभमस्तु ॥ श्रीमन्महागणाधिपतये नमः । गुरुभ्यो नमः श्रीमत्कमलाम्बिकायै नमः । श्रीमत्त्यागेश्वरस्वामिने नमः ॥ शुभमस्तु ॥

Subject: Āpastambaśrautaprayogadīpikā dealing with various Vedic Śrauta Prāyścittas based on the Ninth Praśna (1—5 Paṭalas) of the Āpastambaśrautasūtras of the Black Yajur veda.

Remarks:—The Ms. is in good condition. After the colophon the following is given:—

"उदुस्र तिष्ठ इत्यादि द्विबहुष्वपि चोह्यते ।
उच्छाग तिष्ठ इत्यादेर्द्विबहुष्वेव चोह्यते ॥

गर्भेद्वित्वे तथा त्रित्वे प्रायश्चित्तं विधीयते ॥

अनीहीनैव मन्त्राश्च प्रयोक्तानि...शप: ॥

उद्धृत्य चावदानानि धातृसूर्याहुतिद्वयम् ।

अष्टस्फोटयुतं निष्कं द्विगर्भे द्वादश प्रभुः ॥

*        *        *        *

अवदाने भृगोस्तत्र स्विष्टार्थानिवदाय च ।

शिरो नाभ्याः पुरा च्छित्वा स्विष्टैः सह निधाय च ।

यूष्णा कृत्वा तथा त्र्यर्यं गर्भस्य रसमेव च ।

दैवतादिषु संश्लिष्य व्यवसाया हुत्वा पशोस्तथैव च(?) ॥

पुरोडाशस्य शेषञ्च भस्मनोपसमूह्य च ।

एतं युवानमन्त्रेण वानस्पत्यादिपाशुकम् ॥

यूपे विरूढे प्राप्ते च यस्मिन्यस्य पशोः क्रिया ।

तत्र त्वाष्ट्र उपालभ्यो गणेऽन्यत्र यथाविधि ॥"

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2584. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 a. Page 18. Left column. Substance—Palm leaf. Size $19\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—10 (94—103). Lines—9 to a Page. Script—Grantha. No. of Granthas—150. Author—Tālavṛntanivāsin. Ninth Praśna. A fragment only.

Beginning :

सहस्रात्ययेऽपि सर्वप्रायश्चित्तमेव निमित्तस्य विद्यमान-

त्वात् । नानधिकारः । अग्नीनामनुगमने हि ति लोके(?) अभ्युदये चाधानं विहितम् । तस्याध्यनन्तरं कर्तव्यतैव नर्तुनक्षत्रपर्वादयः । यो विधिनोत्सृष्टाग्निस्तस्य संवत्सरं पराध्र्यमुत्सर्जनं वर्षासु शरदि वा रोहिणीपुनर्वस्वोराधानं विहितं तस्य संवत्सरातिक्रमे सर्वप्रायश्चित्तं कृत्वा आगामिविहितर्तुनक्षत्रयोराधानं संवत्सरादर्वाक्सङ्कल्पितकालेषु ऋत्वतिक्रमे नक्षत्रमादरणीयं सर्वप्रायश्चित्तं कृत्वा केचिद्वर्षात्यये शरदादरणीयेति । तन्न । केचित् सर्वकालात्यये सर्वप्रायश्चित्तं कृत्वाधानमेवेच्छन्ति ॥

End:

अधिकारे विद्यमाने चातुर्मास्यारम्भकाले अनारब्धे यज्ञविभ्रष्टेष्टिं केचिदिच्छन्ति । चतुर्दशीमिश्रितपर्वणि प्रतिपद्यपराह्णे पिण्डपितृयज्ञो न कृतः । तदा सप्तहोता विनष्टाग्नेः स्मृतिचोदितचान्द्रयणादि कर्तव्यम् । एवं विनष्टाग्नेरुत्सृष्टाग्नेश्चाधानं कृत्वा लुप्तानामिष्टीनां पथिकृति वैश्वानरी च समानतन्त्रे । अनंतरातिविपश्चश्च करोति लुप्तानामग्निहोत्रहोमानां सप्तहोता यस्य हविर्त्रिरूपास्ता........भ्युदेतीत्युक्तम् ।

**Colophon:** Nil.

Subject: Āpastambaśrautaprayogadīpikā—a fragment only based on 9th Praśna (Prāyaścitta) of the Āpastamba Śrauta Sūtras of tha Black Yajur-Veda.

Remarks:—The Ms. is in good condition. This Ms. contains the following works:—

| | | | |
|---|---|---|---|
| 1. | आपस्तम्बश्रौतप्रयोगदीपिका | | LL. |
| | | (9th Praśna—a fragment only) | 94—103. |
| 2. | Do. | (10th—15 Praśnas) | 125—202. |
| 3. | Do. | (16th & 17th ,, ) | 221—217. |
| 4. | Do. | (19th ,, ) | 218—257. |
| 5. | Do. | (21st ,, ) | 258—271. |
| 6. | Do. | (18th ,, ) | 272—276. |

---

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2585. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 b. Page 18. Left column.

Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—78 (125-202). Lines—8 to 10 to a page. Script—Grantha. No. of Granthas—4100. Author—Tālavṛntanivāsin. 10—15 Praśnas.

Beginning :

हरिः ॐ ॥ शुभमस्तु ॥

सोमप्रयोग उच्यते । शोधयित्वात्मानं वैराणि प्रशाम्य सर्वपावनानि पवित्रेष्ट्यादीनि यः करोति स सोमयागार्हः । सोम ओषधिविशेषः । तत्साधनत्वात्कर्मनामधेयम् । तेन यक्ष्यमाणः । सोमेन यक्ष्यमाणः यस्य सोमेन यक्ष्यमाणस्य पिता पितामहो वानिष्टप्रथमयज्ञः स ऐन्द्राग्नेनेष्ट्वा सोमेन यजेत । सब्रयेदसोमयाज्यपीति न तस्य सोमपूर्वाधानम् । तस्या(?)वर्णयाति यस्य पितानिष्ठप्रथम-

यज्ञः पितामहो वा उभौ स ऐन्द्राग्नेनेष्ट्वा सोमेन यजेत ।
केचिदन्यतरविच्छेदेनैन्द्राग्न इति पितृविच्छेदेनैन्द्राग्नम् ।
उभयविच्छेद एवैन्द्राग्न इत्यस्य प्रमाणान्तरमस्ति ।
अयस्त्यसूत्रवचनम् । "यस्य द्वौ परावसोमपौ स्यातां स
ऐन्द्राग्नमुक्तं पुनरुत्सृष्टमालभेत" इति। यस्य पित्रादयस्त्र-
योऽप्यनिष्टप्रथमयज्ञाः स ऐन्द्राग्नेनेष्टाश्विनेनेष्ट्वाथ सोमेन
यजेत ॥

End:

वत्सापाकरणं रात्रौ मैत्रावरुण्या दोहनम् । पयसां च-
विश्रसनम् । सवनीयस्य शाखाहरणम् । इध्माबर्हिषो-
राहरणमिति । एतानि पूर्वस्मिन्नहनि उत्तरस्माह्ने कार्या-
णि अहर्गणेष्वेतेषां पदार्थानां द्वयोरेकस्य वाप्यकरणे नमो
ब्रह्मण इति जुहोति । चतुर्थीनिर्दिष्टा देवता । सर्वप्राय-
श्चित्तं जुहोति । प्रजापतिर्देवता । तत्र श्लोकः ।

ज्वालामुखीयोत्तरवेदिवह्न्यो-
र्मध्ये रथादेर्गमने तु पूर्वम् ।
उद्वाप्य पश्चान्नयनं प्रदिष्ट-
मिदं तु शिष्टानलमध्य याते [न] ॥
शान्ते रथाप्यौत्तरवेदिके तु
रथादियाने पथिकृद्गुणेष्टिः ।
शान्तस्य चाग्नीध्रगतस्तु योनिः
पुरेरितः पूर्वगतस्तु योनिः ॥

Colophon:

दशमः पटलः

एकत्रैव विवृद्धेन(एषा त्रैविद्यवृद्धेन)तालबृन्दनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्तौ तालबृन्दनिवासिना कृतायां पञ्चदशप्रश्नः समाप्तः ॥ समाप्तानि हविर्यज्ञप्रायश्चित्तानन्तरं सोमप्रायश्चित्तानि । हरिः ॐ । शुभमस्तु । शिवाय नमः । श्रीमद्गुरुभ्यो नमः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Subject: Āpastambaśrautaprayogadīpikā, based on 10 to 15 Praśnas of the Āpastamba Śrauta Sūtras of the Black Yajur-Veda.

This Ms. contains the following important sections:—

| Subject | Praśna | Paṭalas | Leaves |
|---|---|---|---|
| सोमप्रयोगः | X | 1-10 | 125-138 |
| Do | XI | 1-5 | 138-144 |
| Do | XII | 1-8 | 144-154 |
| Do | XIII | 1-8 | 154-169 |
| Do | XIV | 1-7 | 169-182 |
| उक्थ्यः | XV | 1 | 182 |
| षोडशी | ,, | ,, | ,, |
| अतिरात्रः | ,, | ,, | 183 |
| अप्तोर्यामः | ,, | ,, | 184 |
| अप्तोर्यामसर्वपृष्ठः | ,, | ,, | ,, |
| सोमक्रयः | ,, | ,, | 185 |
| सोमप्रवाकवरणम् | ,, | ,, | ,, |
| एकादशिनी | ,, | 2 | 186-189 |
| वाजिष्ठस्तोमः | ,, | 3 | 189 |

| Subject | Praśna | Paṭalas | Leaves. |
|---|---|---|---|
| प्रायश्चित्तम् | XV | 4 & 5 | 191-202 |

Remarks:—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2586. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

J. L. Collection No. 256. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—112. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—4100. Author—Tālavṛntanivāsin. 10 to 15 praśnas.

Beginning, end, colophon and subject—Same as No. 2585.

Remarks :—The Ms. is in a decaying condition.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2587. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9161. Page 18. Left column. **Substance**—Palm leaf. Size—$17\frac{3}{8} \times 1\frac{1}{4}$ inches. Leaves—183. Lines—7 or 8 to a page. Script—Grantha. No. of Granthas—3800. Author—(?). (Tālavṛntanivāsin?). 10-15 Praśnas—incomplete.

Beginning :

(श्मश्रू)पपक्षत्रापादि केशवर्जं नखादि च ।
पत्न्याः पादान्तमिष्टं स्याल्लौकिकं वस्त्रमिष्यते ॥

केशवापात्पुरा भुक्ते प्राग्वंशे तु कृते तथा ।
स्नात्वा तु लौकिकं वस्त्रं परिधाय भुजिक्रिया ॥

द्वितीयः पटलः । "आ वो देवास ईमहे" "हवामह" इति पूर्वया द्वारा प्रवेशनम् । प्राग्वंशस्येन्द्राग्निभ्यां वा पृथिवीत्य-परेणाहवनीयं दक्षिणा त्रिक्रम्य । "तं दीक्षाणां+पाहि" इत्युपोपविशति । अत ऊर्ध्वमेष एव सञ्चरो यजमानस्य क्रतुसमाप्तेः कर्मनिमित्ते आहवनीयाभिमुख आस्ते ॥

End and subject—Same as No. 2585.

Colophon :

एषा त्रैविद्यवृद्धेन+प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्तौ तालवृन्तनिवासिकृतायां प्रदीपिकायां पञ्चदशप्रश्नसमाप्तिः ॥

वेदोदिताखिलावाप्तिः सन्मार्गज्ञानहेतवे ।
आपस्तम्बमुनीन्द्राय करुणानिधये नमः ॥

Remarks:—The Ms. is in very good condition. There are two fragmentary leaves in the beginning of this Ms., dealing with śrauta prayoga.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2588. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9162 (a). Page 18. Left column. Substance—Palm leaf. Size—$16\frac{1}{3} \times 1\frac{1}{4}$ inches. Leaves—53 (1—53). Lines—6 to a Page. Script—Grantha. No. of Granthas—900. Author—Tālavṛntanivāsin. Sixteenth and Seventeenth Praśnas only

**Beginning:**

अग्निं चेष्यमाणः अग्निरिति इष्टकाकृतस्थण्डिलमुच्यते। तत्संयोगात्क्रतुरग्निरित्युच्यते लक्षणया। तञ्चेष्यमाणः स्थण्डिलमग्निं गुणक्रतुना यक्ष्यमाण इत्यर्थः। योऽग्निः सोऽङ्गं प्रकृतेतूत्तरवेद्यां चाभ्याग्निप्रणयनं तु विहितम्। "तस्यैषस्वो लोको यदुत्तरवेदिर्नाभिः" इति श्रुतेः। साग्निचित्यक्रतौ स्वयमातृण्णायामग्निप्रणयनम्। तस्माद्विकृत्यर्थोऽग्निर्विकृतिस्वग्न्युत्तरवेद्योऽविकल्पः पक्षिभ्यामित्यादिषु पुनर्विहितत्वात्प्रकृतावपि केचिदिच्छन्ति। त्र्यहं दीक्षापक्षे उखासंभरणपक्षे भृति आमिक्षापर्यन्तानि कर्माणि यथा भविष्यन्ति वसन्ते तथा। पर्वण्युखासंभरणपक्षे। तस्यामेव एकाष्टकायाञ्चेत्तस्यामेवोखासंभरणं कृत्वा पश्विष्ट्यादि सर्वं वसन्ते। चतुरो मा(सा)इत्यस्मिन्पक्षे एकाष्टकायां न लभ्यते संभरणम्। मासादिकल्पेषु वसन्तात् पूर्वमेव संभरणम्। वसन्तेवायव्यपशुः। एवं स्मृत्वा समारम्भः। कपर्द्यनुसारेण शुल्बोपधानेन साग्निचित्यस्य क्रतोः प्रयोग उच्यते— वसन्ते पर्वणोरेकाष्टकायां वा प्रातरग्निहोत्रं हुत्वा दर्भान्धारयमाणः पत्नीभिः सह प्राणानायम्य सङ्कल्पं करोति॥

**End:**

यस्माद्देशाद्धावनं कृतं तत्स्थानमावर्तते न वायव्येन पशुनेष्ट्वा संवत्सरादर्वाक्सोमेन यजेत। नान्यासामपि स्त्रीणामुपगमनं क्षत्रियवैश्यविषयः। पक्षिमांसप्रतिषेधः साग्निचित्य उक्थ्यविषय इति केचित्।

समाप्तोऽयं साग्निचित्यक्रतुः ॥ तत्र श्लोकाः—

यदात्वनभिषेकः स्यात्संपातावनयोर्न हि ।
ऋचो हुत्वा प्रभृतैश्च दर्भैस्तरणमेव च ॥
आग्नेयाद्यः पशोः काले विकल्पेन विधीयते ।
एकादशाथयूपे वा कस्मिन्नपि लभ्यते ॥
एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

Colophon :

इत्यष्टमः पटलः ॥

इत्यापस्तम्बप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां प्रदीपिकायां साग्निचित्यः क्रतुः समाप्तः ॥

समाप्तः सप्तदशप्रश्नः हरिः ॐ । शुभमस्तु ॥

Subject : Āpastambaśrautasūtraprayogadīpikā—a Prayoga treatise based on the 16th & 17th Praśnas of Āpastambaśrautasūtras.

1 प्रथमचितिः 10 Paṭalas.

2 साग्निचित्यक्रतुः 8 Paṭalas.

Remarks :—The Ms. is in a fairly good condition. This Ms. contains the following works.

| | | Leaves. |
|---|---|---|
| 1 | आपस्तम्बश्रौतप्रयोगदीपिका (16th & 17th Praśnas) | 1 - 53 |
| 2 | आपस्तम्बशुल्बोपाधानकारिका | 54 - 67 |
| 3 | आपस्तम्बश्रौतप्रयोगदीपिका (18-22 Praśnas) | 68 - 178 & 1 - 189 |
| 4 | आपस्तम्बपौण्डरीककारिका | 190 - 194 |

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2589. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9164 a. Page 18. Left column. Substance—Palm leaf. Size—17¼ × 1½ inches. Leaves —28(1-28). Lines—8 to a Page. Script—Grantha. No. of Granthas—900. Author— Tālavṛntanivāsin. Sixteenth and Seventeenth Praśnas only.

Beginning, end, colophon and subject—Same as No. 2588.

Remarks: —The Ms. is in a fairly good condition. This Ms. contains the following works.

| | | Leaves |
|---|---|---|
| 1. | आपस्तम्बश्रौतप्रयोगदीपिका (16th & 17th Praśnas) | 1 — 28 |
| 2. | आपस्तम्बशुल्बोपधानकारिका | 29 — 36 |
| 3. | आपस्तम्बश्रौतप्रयोगदीपिका (18—22 Praśnas) | 37 — 184 |
| 4. | आपस्तम्बपौण्डरीककारिका | 185 & 186. |

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2590. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 c. Page 18. Left column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—17. (201—217). Lines—8 or 10 to a Page. Script—Grantha. No. of Granthas—800. Author—Tālavṛntanivāsin. Sixteenth and Seventeenth Praśnas. Incomplete.

Beginning:

विवाजसे तृचा दास्राबद्धं विसृजति "आपेोहिष्ठामयो भुवः" इति तिसृभिरप उपसृज्य 'मित्रः संसृज्ये'ति द्वाभ्यां मर्षकपालादिनासंसर्गः । अर्मोग्रामस्थण्डिलं तत्र यानि कपालानि शुचिभूतानि तेषां पिष्टैर्वेणवंगारपिष्टैर्व्रीहितुषै-श्चाष्टाश्रिपक्षे एकैकस्यां दिशि द्वे द्वेऽभिचरत उदीच्यस्ति-स्रः । "अदितिस्तेविलं गृह्णातु" इति बिलकरणं कृत्वायसा-महीमुखामितिकरणदेशाद्दुत्तरसिकतासु स्थापयामीति मि-त्रैतान्त उखामिति मित्रायादित्याय यामरक्षं प्रयच्छति उखां करोति ॥

End, colophon and subject—Same as No. 9162 a.

Remarks :—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2591. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

J. L. Collection No. 257. Substanc— Paper. Size—9¾ × 4¾ inches. Sheets— 127 (3—131; sheets 1, 2, 116 & 117 wanting). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—3650. Author—Talāvṛntanivāsin. 16–19 Praśnas. Incomplete.

Beginning:

अप उपस्पृश्य । देवस्य त्वा । ज्योतिष्मंतंत्वेति द्वाभ्यां खननम् । अप उपस्पृश्य । अपां पृष्ठमसि प्रच्या इति पुष्करपर्णं पूर्वगृही(त)माददाति पुनश्च अपां पृष्ठ-

मसीति विवेष्ट्य कोशीकृत्वा । शर्म(र्म)चस्थः संवसाथामिति द्वाभ्यामुत्तरेण मृत्खननं कृष्णाजिनमास्तृणाति । उपरिष्टात्पुष्करपर्णकोशे(शमुत्तानं) यथास्याचथास्तृणोति पुरीष्योसि विश्वभराः । अग्ने इति मृत्खननस्वाभिमंत्रणम् । अभिहरणं मृदं पात्रे गृहीत्वा तूष्णीत्वमग्रे पुष्करादधीत्यारभ्य धनंजयश्‍रणे रण इत्यन्ताभिः (त्रिभिः) कृष्णाजिने च पुष्करपर्णे च निर्वपति । यदा चतसृभिः पुरीष्योसीत्यारभ्य धनंजयश्‍रणे रण इत्यंतैरेवेनमन्वपश्यन्तेनै(वै) नं संभरतीति लिंगात् ॥

End :

श्रैष्ठ्यमग्रचं(?)स उत्तरया इष्ट्या यक्ष्ये समानानामग्रत्व प्राप्त्यर्थम् । अनुष्टूकः स्तनेषु व्रीहिषु मूलेभ्यः प्ररूढा अनुष्टूका ओत्रं तवेन् । तेभ्यो निर्वापः सैंद्रश्चरुतिर्वपा इन्द्राय जुष्टम् । वृधद्वग्रं वृधादग्रेणेति याज्यानुवाक्ये । ब्राह्मणस्याग्न्वकामिजः स्वाना वा वहिस्पत्य आनुष्टूकः श्वरः इष्ट्या यक्ष्ये समानामामग्रचम वाग्रवानिवहुस्य ? जुष्टं उक्ताः प्रयोजके महावृधायैाग्रमिति तिसृणामुत्तरा विकृत्यर्थापः पापपक्षगृहीतः स उत्तरया इष्ट्या यक्ष्य रोगशान्त्यर्थं आदित्योन्योजुष्टे निर्वपामि उत्ताग्रयोनवोपमादित्या अमावास्यायामेव यागः अमावास्यान्तां । आदित्यादेवता अन्नाद्यकाम...

Colophon : (Sheet No. 40).

एषा वैविद्यवृद्धेन + प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्यां तालवृन्तनिवासिकृतायां

श्वाग्निचित्यः समाप्तः ॥

Subject : Āpastambaśrautaprayogadīpikā 16—19 Praśnas.

Remarks :—The Ms. is in a decaying condition. This Ms. abruptly begins in the middle of the 1st Paṭala of the 16th Praśna and breaks off towards the close of the 19th Praśna. This Ms. is full of scriptorial blunders.

---

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2592. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9162 c. Page 18. Left column. Substance—Palm leaf. Size—16⅓ × 1¼ inches. Leaves—301 (68-178; 1-189). Lines —6 to to a Page. Script—Grantha. No. of Granthas—5600. Author—Tālavṛnta-nivāsin. 18-22. Praśnas.

Beginning:

कपर्द्यभिप्रायेण वाजपेयमारभ्य विश्वसृजामयनपर्यन्तानां कर्मणां प्रयोग उच्यते । वाजपेयो द्विप्रकारः । आप्तवाजपेयः क्रतुवाजपेयश्च । अस्मिन् क्रतौ नाग्निचयनम् प्रतिषेधात्परिभाषायाम् । केचिदत्रापि छन्दोगमतात्तु चयनं कार्यमिति । ज्योतिष्टोमस्य संस्थाभूतोऽपि वाजपेयोऽस्तीति छन्दोगोक्तम् । आपस्तम्बेन क्रत्वन्तरत्वेन वाजपेय उक्तः । क्रत्वन्तरवाजपेयस्य द्विप्रकारत्वमुक्तम् । अस्य वाजपेयस्य प्रथममुच्यते । सप्तदशदीक्षापक्षे शरदि दशम्यामुपक्रमः । त्रयोदशदीक्षापक्षे चतुर्दश्यामुपक्रमः । पर्वणोः सुत्या भवति प्रातरग्निहोत्रं हुत्वा आप्तेन वाजपेयेन यक्ष्ये ॥

End:

व्याघ्रो वैयाघ्र इत्यादि हीनमभिमन्त्रयते पुरोहितः । अथोनन्तोत्मावस्ताभिर्दूर्वासास्ताभिर्वाग्भिराजानमभिषिञ्च-ति पुरोहितः "वा दिवा" इत्यारभ्य "शाक्तेन छन्दसा" इ-त्यैतैर्मन्त्रैररुणत्वाष्ट्रकमित्येनमभिमन्त्र्य प्रवाहति वा प्रसस्ये-न्द्रस्यते वीर्यं इत्युपावहरन्ति । अग्रेणाग्निं रथोऽवस्थितो भव-ति । अभिप्रेहीति तं राधाभ्यैतिष्ठ वतहंनम(?) इति हारोह-न्तमभिमन्त्रयते । अङ्कौ न्यङ्काविति रथचक्राभिमृशति पक्ष-सि वा । "आतिष्ठ वृत्रहन्" इति षड्भिरारूढं "परिमासे-न्या" इति द्वे वाचयित्वा उत्तराभिस्तिसृभिरभिमन्त्र्य उद-वसायेत्विरत्यादित्यमुपदीक्षते अन्नयामिति जनपदान् सान्ति-ष्ठते राजाभिषेकः सन्तिष्ठते सवः ॥

Colophon:

स वाः॥ तत्र श्लोकः ॥

एषात्रैविद्यवृद्धेन तालवृन्तनिवासिना ।

\+ प्रयोगस्य प्रदीपिका ॥

इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां **तालवृन्तनिवासि**कृतायां **प्रदीपि-कायां** सवाः समाप्ताः ॥

हरिः ॐ अविघ्नमस्तु । शुभमस्तु ॥

Subject: Āpastambaśrautasūtraprayogadīpikā. 18-22 Praśnas.

This Ms. deals with the following important topics:—

| Subject. | Praśna. | Paṭala. | Leaves. |
|---|---|---|---|
| **वाजपेयम्** | XVIII | 1—3 | 68—90 |
| (a) आप्तवाजपेयम् | " | " | 68—83 |
| (b) कुरुवाजपेयम् | " | " | 83—90 |

| Subject. | Praśna. | Paṭala. | Leaves. |
|---|---|---|---|
| राजसूयम् | XVIII | 4—8 | 90—109 |
| सौत्रामणि | XIX | | 109—121 |
| कौकिली | ,, | | 121—130 |
| काठकाः | ,, | | 130—153 |
| (a) सावित्रचयनम् | ,, | | 130—135 |
| (b) नाचिकेतचयनम् | ,, | | 135—138 |
| (c) चातुर्होत्रम् | ,, | | 138—139 |
| (d) वैश्वसृजचयनम् | ,, | | 139—141 |
| (e) आरुणकेतुकः(पञ्चमः काठकः) | ,, | | 141—153 |
| दिवश्श्येनयः | ,, | | 153 |
| काम्यपशुबन्धाः | | | 153—171 |
| काम्येष्टयः | | | 171—178 & 1—29 |
| अश्वमेधः | XX | 1—6 | 29—55 |
| पुरुषमेधः | ,, | ,, | 55—62 |
| द्वादशाहः | XXI | 1—4 | 63—88 |
| (a) 1 समूढसत्रम् | ,, | ,, | 83 |
| 2 काठकाभियुतसत्रम् | ,, | ,, | 84 |
| (b) अहीनम् | ,, | ,, | 84—86 |
| 1 व्यूढद्वादशाहः | ,, | ,, | 86—88 |
| 2 भरतद्वादशाहः | ,, | ,, | 88 |
| गवामयनम् | ,, | 5 | 88—94 |
| महाव्रतम् | ,, | 6 & 7 | 93—99 |
| उत्सर्गिणामयनम् | ,, | ? | 99—101 |

| Subject. | Praśna. | Paṭala. | Leaves. |
|---|---|---|---|
| एकाहः | XXII | ? | 101—159(?) |
| विश्वजिदग्निष्टोमः | ,, | ? | 103 |
| इन्द्रस्याभिदग्निष्टोमः | ,, | ? | 104 |
| चत्वारः साहस्राः | ,, | ? | 105 |
| विश्वजिच्छिल्पम् | ,, | ? | 112 |
| श्येनयागः | ,, | ? | ,, |
| त्रयो वाचस्तोमानि | ,, | ? | 114 |
| व्रात्यस्तोमः | ,, | 2 | 115 |
| नाकसदसः पञ्च | ,, | 3 | 118 |
| त्रिवृत्स्थाग्निष्टुत् | ,, | ,, | 119 |
| बृहस्पतिसवः | ,, | ,, | 120 |
| सर्वस्वारः | ,, | ,, | 123 |
| चातुर्मास्यम् | ,, | ,, | 123—134 |
| (a) वैश्वदेवम् | ,, | ,, | 123—126 |
| (b) वरुणप्रघासः | ,, | ,, | 126—130 |
| (c) साकमेधः | ,, | ,, | 130—133 |
| (d) शुनासीरीयः | ,, | ,, | 133—134 |
| उपहव्यम् | ,, | ,, | 134 |
| ऋतपेयम् | ,, | ,, | 135 |
| इन्द्रस्तोमः | ,, | ,, | 137 |
| अग्निष्टुत् | ,, | ,, | 138 |
| तीव्रसुत | ,, | ,, | 138 |
| पुनस्तोमः | ,, | 4 | 140 |

| Subject. | Praśna. | Paṭala. | Leaves. |
|---|---|---|---|
| सर्वतोमुखम् | XXII | 4 | 141 |
| उद्भिद्बलभित् | ,, | ,, | 154 |
| अपचितिः | ,, | 4 | 155 |
| पक्षिसाग्निचित्यम् | ,, | ,, | ,, |
| कुलायः | ,, | ,, | 157 |
| त्रिवृदतिरात्रः | ,, | ,, | 158 |
| षोडशिक्लृप्तिः | ,, | ,, | 159—160 |
| **अहीनाः** | ,, | ,, | 160—189 |
| व्युष्टिद्विरात्रः | ,, | 5 | 160 |
| गर्गद्विरात्रः | ,, | ,, | 161 |
| वैदत्रिरात्रः | ,, | 6 | 167 |
| वसिष्ठचतूरात्रः | ,, | ,, | 169 |
| पञ्चपञ्चाहः | ,, | ,, | ,, |
| चत्वारः षडहाः | ,, | 7 | 173 |
| अष्टौ सप्तरात्राः | ,, | ,, | 177 |
| अष्ट रात्राः | ,, | ,, | 180 |
| शल्लीपिशङ्गः | ,, | 7 | 181 |
| चत्वारो दशरात्राः | ,, | ,, | ,, |
| पौण्डरीकैकादशरात्राः | ,, | ,, | 184 |
| प्रहक्लृप्तिः | ,, | ,, | ,, |
| **सवानां कर्म** | ,, | 8 | 185—189 |
| वैश्यसवः | ,, | ,, | 185 |
| ब्राह्मणस्वं द्वितीयाग्नेयादि | ,, | ,, | ,, |

| Subject | Praśna | Paṭala. | Leaves. |
|---|---|---|---|
| सोमस्व: | XXII | 8 | 186 |
| राजाभिषेककर्म | ,, | ,, | 188 to 189 |

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 2588.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2593. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9164 c. Page 18. Left column. Substance—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—148 (37—184). Lines—8 to a Page. Script—Grantha. No. of Granthas—5600. Author-Tālavṛntanivāsin. 18-22 Praśnas.

Beginning, end, colophon and subject—Same as No.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see the Remarks under No. 2589.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2594. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 f. Page 13. Left column. Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—5 (272—276). Lines—8 to a Page. Script—Grantha. No. of Granthas—250. Author—Tālavṛntanivāsin. Eighteenth Praśna only (Incomplete).

Beginning—Same as No. 9162 c.

End:

यजमानः पत्न्याप्यारोहणावरोहणेऽग्रेण यूपं वस्ताजिनं

प्राचीनग्रीवमुत्तरलोमास्तीर्य तस्मिञ्छतमानं हिरण्यं निद- धात्यध्वर्युः "अमृतमसि" इति यजमानः हिरण्ये दक्षिणं पादमवदधाति । "पुष्टिरसि प्रजननमसि" इति बस्ताजिने सव्यं तस्माच्चर्मणो भूमिं स्पृशन् आसन्दीं दक्षिणायतां प्रागायतां रोहति दिवं प्रोष्ठनीमित्यारोहन्तं यजमानमभि- मन्त्रयतेऽध्वर्युः सप्तभिः पूर्वमन्त्रैः प्रचारण्याश्चौषधीः(?) संमृज्य समवदाय वार्धेस्समासीति मन्त्रैः ॥

Subject: Āpastambaprayogadīpikā, based on the 18th Praśna of the Āpastambaśrautasūtra of the Black Yajur Veda.

Remarks:— The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 2584.

---

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2595. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139 d. Page 18. Left column Substance—Paper. Size—19¼ × 1¾ inches. Leaves-40 (218-257). Lines—8 to 10 to a Page. Script—Grantha. No. of Granthas—2000. Author—Tālavṛntanivāsin. 19th Praśna only.

Beginning:

सौत्रामण्याः कर्मोच्यते । नवम्यां सौत्रामण्या यक्ष्य इत्युक्त्वा "विद्युदसि" "षड्ढोता" । पशुवत् सीसेन क्लीबाच्छ- ष्पाणि क्रीणाति सीसम् ஈயம் शष्पाणि विरूढयवा व्रीहयो वा क्षौमे वाससि बध्वा स्थाप्यते त्रिरात्रं यथा न शुष्काणि भवन्ति तथोपायः क्रियते । षड्ढोत्रादिः परित्यज्यतेऽन्य-

स्मिन्नाग्निहोत्रहोमः । ततो द्वादश्यां प्रातरग्निहोत्रं हुत्वा सुरेष्ठ्यर्थमग्निः प्रणीयते । न "विद्युदसि" । ततोऽग्न्य-न्वाधानम् ॥

End :

इन्दुरासिरीये वायो शुनासीर्यस्योक्ते सूत्रकारेण "तरणि-र्दिवो रुक्मः" "चित्रं देवानाम्" इति वा सौर्यस्य ॥ तत्र श्लोकाः ॥

शत[क्षत]कृष्णलया यक्ष्ये भक्षणं तु विधीयते ।
आज्ये प्रथाज्येष्वक्षोष्य कृष्णलैः सह भूयते ॥

❀ ❀ ❀ ❀

उत्करे वेदिधर्माः स्युर्वर्षाहस्तु पुनर्नव ।
सवकारीरनामस्याद्यक्षेत्रैधानवी यया ॥
तथा यवमयो मध्ये दाम्नो राजन्य एव च ।
वैश्वानरी च प्रोक्ता(?) सौवर्णं दाम दक्षिणा ॥

Colophon :

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
कौशिकेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

हरिः ॐ । शुभमस्तु ॥

Subject : Āpastambaśrautaprayogadīpikā based on the 19th Praśna of the Āpastambaśrautasūtras of the Black Yajurveda.

This Ms. contains the following important sections:—

| Subject | Praśna | Leaf |
|---|---|---|
| सौत्रामणी | XIX | 218—221 |
| मैत्रावारुणी | ,, | 221 |
| कौकिली | ,, | 221—225 |

Remarks:—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2596. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9172 a. Page 25. Right column.

Substance—Palm leaf. Size—$16 \times 1\frac{1}{2}$ inches. Leaves—52 (1-42 and 63 to 72 out of 144). Lines—8 to a Page. Script—Grantha. No. of Granthas—2000. Author—Tālavṛntanivāsin. 19th Praśna only.

Beginning, end, colophon and subject—Same as No. 2595.

Remarks:—The Ms. is in decaying condition. For the other works contained in this Ms. see the list under Remarks on No. 2057.

---

## ॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2597. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9139e. Page 18. Left column. **Substance**—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—14 (258—271). Lines—8 to 10 to a Page. Script—Grantha. No. of Granthas—650. Author—Tālavṛntanivāsin ? Twenty-first Praśna only.

Beginning:

द्वादशाहस्य प्रयोग उच्यते । स तु द्विप्रकारः । सत्रभूतोऽहीनभूतश्च । तत्र सत्रभूतो द्विप्रकारः । व्यूढसमूढतया । अहीनभूतोऽपि तथैव । चित्योग्निर्नियतः काठको वा । तत्र महाग्निपक्षमाश्रित्य सूत्रभूतप्रयोगं सप्तदशावराध्याः पुरुषाः शिशिरे एकाष्टायामिष्टप्रथमयज्ञाः स्वाग्नीन् समारोप्य एकत्र त्वा साग्निसन्निधौ सर्वे द्वादशाहेन सत्रभूतेन साग्निचित्येन यक्ष्यामहे प्रजायेमहीति सङ्कल्पः । स्वर्गोऽपि फलम् । विद्युत् । न सोमप्रवाकवरणम् । नर्त्विग्वरणम् । अन्योन्यन्त्वस्माकं गृहपतित्वं ब्रह्मेति पारस्परदीक्षाक्रमेण परस्परं विज्ञापयन्ति । ततो देवयजनयाच्ञा देवतोपस्थानं वा तत्र द्रव्यसंसर्गमसाधारणद्रव्येण गृहपतिर्नान्दीश्राद्धं करोति ।

End:

यां कृत्वा पुनश्चोखासंभरणं कृत्वा सौत्रामणीमैत्रावरुणी च त्र्यनीकाग्राह्यपक्षे एकादशिन्य(?) उगत्सर्गिणमययेन वा पवमाना भवेयुः तस्योत्सर्गप्राप्तिः तस्यामह्नः प्राप्तानाप-

श्रतिग्राह्याणान्स्याश्च एव उत्सृष्टानां पुनराहारणे च उत्सर्गो यत्पापादि प्राप्तुं तथेहायुष्या सन्तत्यत्र पश्वर्थं वा नरकपातकनिवृत्तिर्वा । एवं गुणविकृतस्य फलम् ।

Colophon :

उत्सर्गिणामयनं समाप्तम् ॥ हरिः ॐ ॥

द्वादशाहप्रयोगः समाप्तः ॥

Subject : Āpastambaśrautaprayogadīpikā based on the 21st Praśna of the Āpastambaśrautasūtras of the Black Yajurveda.

This Ms. deals with the following important topics:—

| Subject | Praśna | Leaf. |
|---|---|---|
| द्वादशाहः | XXI | 258—265 |
| सत्रात्मकः समूढः | ” | 265—268 |
| गवामयनम् | ” | 268 |
| गो आयुषी | ” | 269 |
| व्यूढद्वादशाहप्रयोगः | ” | ” |
| उत्सर्गिणामयनम् | ” | 270 & 271 |

Remarks :—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 2584.

---

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

## 2598. ĀPASTAMBAŚRAUTAPRAYOGA-DĪPIKĀ.

Burnell's Catalogue No. 9172 (i). Page 25. Right column.

Substance—Palm leaf. Size—16 × 1½ inches. Leaves—7

(80—86). Lines—8 to a Page. Script—Grantha. No. of Granthas—180. Author—Tālavṛntanivāsin. Sarvatomukha only.

Beginning:

सर्वतोमुखम् ॥ सर्वतो(मुखेन) यः कामयेत सर्वमिदं भवेयमिति अहमेव सर्वस्येश्वरो भूयासमिति यः कामयेत स सर्वतोमुखेन यजेत । मोक्षार्थमेतत्कर्म । मध्ये गार्हपत्यः प्रतिदिक्षु सौमिका विहाराः दक्षिणाग्निशालामुखीयाद्याः । दक्षिणहस्तसमीपे दाक्षिणाग्निकल्पनम् । सर्वत्र देशभेदाद्दाग्निभे(दः स्तोत्र)दात् शास्त्रभेदाच्च तृवृत् । प्राच्यां दिशि पञ्चदशो दक्षिणतः सप्तदश पश्चादेकविंश उत्तरतः । षोडशिकानि(षडाहिका)न्ये तान्यहानि द्वादशाहीयदशरात्रिकाणि । तस्मात् द्वादशाहधर्मा अ[न]हीनधर्माश्च प्रवर्तन्ते । द्वादशाहवद्दीक्षाकालः ॥

End:

पूर्वस्मिन्नेव केचित्प्रतिविहारमिच्छन्ति "इन्द्रेण सयुजो वयम्"इत्यावर्तते अवभृथादि सर्वत्राप्सु प्रचारः । मन्त्रेण एकस्मिन् सोमोष्णीषादि परिधानान्तम् । "अपाम सोमम्" इत्यादि तन्त्रेण समिदाधानं(नान्तं)उपस्थानञ्च भेदेन । उदयनीयादि सर्वत्रानुबन्ध्यावपाहोमान्तं पयस्याहोमान्तं वा कृते । प्रति होमपात्नीवता उत्तरविहारस्यैव केचित् । अयं व इत्येकं प्रतिविहारं वेद(देव)मुपस्थ आधायेत्यादि ब्राह्मणतर्पणान्तमुत्तरस्मिन् विहारे केचित् पूर्वस्मिन्निति उपोषण(ादिपृष्ठ्यन्तं)सर्वत्र स्वसिद्धान्तः (अथ) प्रजाहितं समारोप्येत्यादि इदमूनित्यध्यवसायमध्ये (गार्हपत्य इत्या-

दिवि)धिना दार्शिकत्रेदिचतुष्टयम(न्य)न्वाधनादि उदव-
सानीया प्रतिविहारं पूर्णाहुतिर्वा । के(चिदेकमेव) विहारं
कुर्वन्ति । अस्मिन्नुदवसानीया पूर्णाहुतिर्वा प्रतिदिशं
सौमिकविहारमिति वचनात् ॥

**Colophon:**

समाप्तः सर्वतोमुखः ॥

Subject: Āpastambaśrautaprayogavṛtti (Sarvatomukhaprayoga only) based on the 22nd Praśna of the Āpastambaśrautasūtras.

**Remarks**:—The Ms. is in decaying condition. For the other works contained herein see the Remarks under No. 2057. After the colophon the following is given:—" अनन्तरे पर्वणि सौत्रामणी ते मैत्रावरुणीतपशु.... द्वादशाहे प्रायणीये प्रातरनुवाकात्पुरस्तादग्निं युनज्मीति तिसृभिरग्निमाभिमृशति+इन्द्राय त्वा विश्वेदेव्यावते । वायुरसि । एवं व्यतिषङ्गः

द्विपदान्तँ हरेत्स्पष्टं प्रस्तारे पञ्चमे ततम् ।
विशेषं तत्र वक्ष्यामो द्विसाहस्र...... ॥"

---

## ॥ यज्ञतन्त्रसुधानिधिः ॥

## 2599. YAJÑATANTRASUDHĀNIDHIḤ.

Burnell's Catalogue No. 3683. Page 23. Right column. Substance—Paper. Size—$11\frac{1}{4} \times 4\frac{3}{4}$ inches. Sheets—39. Lines—13 to 15 to a Page. Script—Devanāgarī. No. of Granthas—1350. Author—Sāyaṇācārya. Ādhāna only.

**Beginning:**

श्रीगणेशाय नमः ॥ श्री अरुणाद्रीश्वराय नमः ॥

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्यास्स्युस्तन्नमामि गजाननम् ॥ १ ॥

सत्सूत्रान्वितशाश्वतागममहारत्नं विधानं गिरां
प्रत्यक्चित्तमुपास्महे वयममी बोधाय बौधायनम् ।
यद्वाङ्नावमबन्ध्यबन्धमहतीं प्राप्याध्वराम्भोनिधेः
पारं यान्ति मनीषिणो बहुविधैस्तन्त्रस्यतस्योर्मिभिः ॥२॥

सूर्याचन्द्रमसौ प्रकाशवपुषावास्तां जगच्चक्षुषी
ताभ्यामन्वययोर्द्वयं समुदभूत्तत्राविराभूद्यदुः ।
वंशे चन्द्रमसे तदन्वयनिधिः श्रीसं(ं)भोभून्नृप
तस्मात्प्रादुरभूदभीष्टसुरभिश्रीबुक्कपृथ्वीपतिः ॥ ३ ॥

हरिहरनिभभूमा कामदोभूज्जगत्यां
हरिहरनरपालस्तस्य भूष्णुस्तनूजः ।
परिणयति धरित्री यस्य कीर्तिप्रताप-
प्रभवत परिणाहैर्व्यक्तनक्तन्दिनश्रीः ॥ ४ ॥

मण्डले च कृपाणस्य मण्डलाग्रे च तीक्ष्णताम् ।
विदुषाङ्कम्पयन्भाति विद्विषाञ्च शिरांसि यः ॥

समधिकविभ(व)श्रीस्सत्क्रियाभिर्द्विजानां
हरिहरनरपालः कस्य न स्यात्प्रशस्यम्(ः) ।
अवितथगतिभिर्यद्दानधारासरिद्भि-
र्नवनवपरिणेता वर्धते सिन्धुराजः ॥ ६ ॥

तस्याभूदन्वयगुरुस्तत्त्वसिद्धान्तदर्शिनः ।
सर्वज्ञः सायणाचार्या(र्यो) मायणार्यतनूद्भवः ॥ ७ ॥

उपेन्द्रस्येव यस्यासीदिन्द्रस्सुमनसाम्प्रियः ।
महाक्रतूनामाहर्ता माधवार्यसहोदरः ॥ ८ ॥

यस्य निश्वसितं श्रुतीर्बहुविधा व्यासावतार(ः) स्वयं
व्यासोक्ताः पुनरध्वरश्रुतफला बौधायनात्मा व्यधात् ।
कल्पाध्वक्रयतः प्रयोगसुलभांस्तान्विप्रकीर्णान्बहू-
नेकीकृत्यमयं हरिस्समजनि श्रीसायणार्यः क्षितौ ॥ ९ ॥

ससत्कुर्वन् महादानान्याम्नायोक्तान्यनुक्रमात् ।
तुलापुरुषदानेन भूसुरान्समतोषयत् ॥ १० ॥

तस्मिन्महोत्सवे सन्तः प्रशंसन्तस्तदद्भुतम् ।
उपासत तदैकात्म्यादुन्नतश्रीपरिच्छदाः ॥ ११ ॥

स तैः प्रकाशितो यान्तःप्रकाशात्मा व्यरोचत ।
प्रभाकरस्तुलारूढः प्रांशुर्ज्योतिर्गणैरिव ॥ १२ ॥

ते तपस्तेजसां राशिमासीनं परमासने ।
सर्वज्ञं सायणाचार्यं पर्यपृच्छन्सभासदः ॥ १३ ॥

अधीतास्सकला वेदास्ते च दृष्टार्थगौरवाः ।
तत्प्रणीतेन तद्भाष्यप्रदीपेन प्रथीयसा ॥ १४ ॥

वेदास्सर्वेपि यज्ञार्थास्तत्प्रयोगान्सविस्तरान् ।
प्र(प्रा)णैषीदात्मकल्पेन महाबौधायनो मुनिः ॥ १५ ॥

स पुनर्विप्रकीर्णत्वाद्गहनत्वाच्च देशिक ।
न स्थूलबुद्धिभिः शक्यमस्माभिरवगाहितुम् ॥ १६ ॥

आध्वर्यवेण हौत्रेण तथौद्गात्रेण वा विना ।
न निर्वहन्ति कार्त्स्न्येन वैदिक्यो निखिलाः क्रियाः ॥

पूर्वे तु ग्रन्थकर्तारो ह्येकैकत्र कृतश्रमाः ।
तत्रापि कार्त्स्न्यतो वक्तुश्चैव यत्नं समाश्रिताः ॥ १८ ॥
तदद्य बहुसन्देहनिवृत्तिकरणक्षमम् ।
विधेहि कृपयास्माकं यज्ञतन्त्रसुधानिधिम् ।
तेषान्तद्वचनं श्रुत्वा सायणार्यः कृपानिधिः ॥ १९ ॥
त्रयीसूत्राणिसंवीक्ष्य तन्निबन्धांश्च कृत्स्नशः ।
संगृह्य सारं कृतवान्यज्ञतन्त्रसुधानिधिम् ॥ २० ॥

अग्नीनाधास्यमानस्सर्वदुरितापूर्वपापक्षयकामस्सर्वप्राय-श्चित्तरूपं कूश्माण्डहोमं कुर्यात् । तस्यामावास्यायां पौर्णमा-स्यां वोपक्रमः । तस्यायं प्रयोगक्रमः । एनोनिबर्हणार्थं कूश्माण्डैर्होष्यामीति सङ्कल्प्य श्मश्रूपपक्षकेशलोमनखानि वापयित्वा स्नानाद्यनन्तरन्देवतादिसङ्कल्पङ्कुर्यात् । पुण्याहे देवताग्न्यादयः । प्रधानदेवता सविता । चरुर्हविः । आ-घारन्तन्त्रम् । तं देवयजनोल्लेखनाद्यग्निमुखान्तं कृत्वा "भूर्भुवस्सुवरोम्" इत्यनुद्रुत्य "तत्सवितुर्वरेण्यम्" इत्ये-तया पक्कं हुत्वा स्विष्टकृतमवदाय अन्तःपरिधि सादयि-त्वाज्याहुतीरुपजुहोति ॥

End :

अथवा आधानोक्तामाग्नेयेष्टिं कृत्वा अग्न्याधेयदक्षि-णान्दत्वा आग्नेयम्पञ्चकपालम्पुनराधानोक्तङ्कृत्वा पुनरा-धानोक्तदक्षिणां दद्यात् । इन्द्राग्न्यादिति देवतानिष्टिं कृत्वा द्वादशाहव्रतचर्यान्ते अग्नये पवमानायेष्टिः अग्नये पावकाय अग्नये शुचयेष्टिः । आग्निवारुणीष्टेरनन्तरमिति के-चित् । पुनराधानानन्तरं संवत्सरात्पूर्वं पुत्रमरणादिनिमित्ते

पुनरपि पुनराधानं कुर्यात् । तस्मिन् तृतीया आधाने पञ्च-
कपालस्याग्नेयस्य स्विष्टकृद्वदानानन्तरं स्रुवाहुतीरुपजु-
होति लेकः सलेकः सुलेकस्तेन आदित्या आज्यं जुषा-
णावियं तु स्वाहा ॥ आदित्येभ्य इदम् ॥ वित्रस्वाः आदि-
तिर्देवजूतिस्तेन आदित्या आज्यं जुषाणावियन्तु स्वाहा ॥
आदित्येभ्य इदम् ब्राह्मणतर्पणान्तं समानम् ॥ अथ सर्वाग्नि-
नाशे समारूढारणीनाशे च अग्नीनाधास्ये ॥ विच्छिन्नस-
न्धानार्थमिति सङ्कल्प्य ॥ ऋत्विग्वरणादिगोपितृयज्ञवर्ज-
मविकृतमग्न्याधेयङ्कुर्यात् ॥

Colophon :

इति श्रीयज्ञतन्त्रसुधानिधौ पुनराधानप्रकरणं
समाप्तम् ॥ श्रीः श्रीः ॥

(Sheet 35)

इति श्रीमद्राजाधिराजपरमेश्वरवीरहरिहरसकलसाम्राज्यधुरंधरवैदिकमा-
र्गस्थापनाचार्यस्य श्रीसायणाचार्यस्य कृतौ यज्ञतन्त्रसुधानि-
धावाधानप्रकरणं सम्पूर्णम् ॥

Subject: Yajñatantrasudhānidhi—a popular śrauta prayoga treatise based on the Bodhāyanaśrautasūtras of the Black Yajur Veda. This Ms. contains the Ādhāna portion only.

Remarks:—The Ms. is in good condition.

---

## ॥ यज्ञतन्त्रसुधानिधिः ॥

## 2600. YAJÑATANTRASUDHĀNIDHIḤ.

J. L. Collection No. 258. Substance—Paper. Size—$9\frac{7}{8} \times 4\frac{1}{4}$

inches. Sheets—65. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—1300. Author—Sāyaṇācārya. Ādhāna only.

Beginning, end, colophon and subject—Same as No. 3683.

Remarks: —The Ms. is in a decaying condition.

---

## ॥ यज्ञतन्त्रसुधानिधिः ॥

## 2601. YAJÑATANTRASUDHĀNIDHIḤ.

Burnell's Catalogue No. 3956. Page 24. Left column. Substance—Paper. Size—$9\frac{1}{4}\times4\frac{1}{4}$ inches. Sheets—65. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Sāyaṇācārya. Cāturmāsya only.

Beginning :

श्रीगणेशाय नमः ॥

अथ चातुर्मास्यान्युच्यन्ते । चातुर्मास्यानीति कर्मसमुदायनाम । तस्य चतुर्धा प्रयोगः । यावज्जीवः सांवत्सरिको द्वादशाहा यथाप्रयोगश्चेति । यथाप्रयोग इति प्रयोगपर्याप्तः कालः । एषु पूर्व[ ]पूर्व(ः)श्रेयान् । अत्र यावज्जीवसांवत्सरिकयोर्वैश्वदेववरुणप्रघाससाकमेधशुनासीर्याणां यथाक्रमं फाल्गुन्याषाढीकार्तिकीफाल्गुनीपौर्णमासीषु प्रयोगः । चैत्री श्रावणी मार्गशीर्षीषु तिसृषु वा । पक्षद्वयेऽपि पर्वणोरन्तराले वा व्रतचर्या । यावज्जीवपक्षे द्वितीयादिवर्षेषु वैश्वदेवयागः । प्रतिपदि प्रथमवैश्वदेवयागोऽपि । प्रतिपदि यावज्जीवप्रयोगे प्रथमसंवत्सरे व्रतचर्या । अत ऊर्ध्वं दर्शपूर्णमासिकमेव व्रतम् । द्वादशाहप्रयोगे तूदगयन आपू-

र्यमाणपक्षे पुण्यनक्षत्रे आरम्भः । समाप्तिरपि पूर्वपक्ष एव । समाप्तिरपरपक्ष इति केचित् ॥

End:

संस्थितामिष्टेः वैश्वदेववरुणप्रघाससाकमेधशुनासीर्यासंबन्धिनां यथाक्रमं विश्वदेववरुणेन्द्रशुनासीर्याणामपि हविषामुपांशुत्वं केचिदिच्छन्ति ॥ समाप्तानि चातुर्मास्यानि ॥ अनन्तरमेतदङ्गत्वसोमो विहितः । तदशक्तस्य पुनः पशुश्चातुर्मास्यानि । तत्राप्यशक्तस्य सवनेष्टिः । तत्र सोमस्य प्रयोगः उत्तरत्र वक्ष्यते । पशोश्चातुर्मास्यानाञ्चोक्त एव प्रयोगः । सवनेष्ट्यां तु अग्निरिन्द्रो विश्वेदेवा इति तिस्रो देवताः । पौर्णमासवत्तन्त्रम् । प्रधानस्याग्निः । अग्निर्मूर्धा भुवोजस्येति इन्द्रस्य एन्द्रसानसिंरयिं प्रससाहिषे पुरुहूतः विश्वेषां देवानां विश्वेदेवास आगत ये के च ज्मा इति याज्यानुवाक्या । प्रकृतिवदितरत् ॥

Colophon:

इति श्रीमद्राजाधिराजपरमेश्वरहरिहरमहाराजसकलसाम्राज्यधुरंधरस्य वैदिकमार्गस्थापनाचार्यस्य सायणाचार्यकृतौ यज्ञतन्त्रसुधानिधौ आश्वलायनोक्तचातुर्मास्यहौत्रप्रकरणं समाप्तम् ॥

ग्रन्थसंख्या १३०० ॥

Subject: Yajñatantrasudhānidhi—Cāturmāsyaprayoga only based on the Sixth (fifth) Praśna of Bodhāyana sūtras.

| | | |
|---|---|---|
| 1 वैश्वदेवः | Sheet | 3 |
| 2 वरुणप्रघासः | " | 11 |
| a अवभृथः | " | 23 |

| | | |
|---|---|---|
| 3 साकमेधः | Sheet | 27 |
| a महापितृयज्ञः | ,, | 47 |
| 4 शुनासीरीयम् | ,, | 49 |
| a आदित्येष्टिः | ,, | 63 |

Remarks :—The Ms. is in good condition.

॥ यज्ञतन्त्रसुधानिधिः ॥

## 2602. YAJÑATANTRASUDHĀNIDHIḤ.

J. L. Collection No. 259. Substance—Paper. Size—9¾ × 4⅝ inches. Sheets—47. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Sāyaṇa. Cāturmāsya only.

Beginning, end, colophon and subject—Same as No. 3956.

Remarks :—The Ms. is in good condition.

॥ यज्ञतन्त्रसुधानिधिः ॥

## 2603. YAJÑATANTRASUDHĀNIDHIḤ.

Burnell's Catalogue No. 4150. Page 25. Left column. Substance—Paper. Size—11¾ × 5⅛ inches. Sheets—43. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Sāyaṇācārya. Agniṣṭoma only.

Beginning :

श्रीगणेशाय नमः ॥

अथोद्गातृप्रयोगः ।

ऋत्विगार्षेयोनूचान इत्याद्युक्तलक्षणवानृत्विग्भवति ।

यज्ञशर्मा ज्योतिष्टोमेनाग्निष्टोमसंस्थेन रथन्तरपृष्ठेन द्वादशशतगवदक्षिणेन सोमेन यियक्षतो तत्रौद्गात्रं भवता कर्तव्यमिति सोमप्रवाकेनाभ्यर्थितः ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरपृष्ठेन द्वादशशतदक्षिणेनाहं यक्ष्ये, तत्र 'मे त्वमुद्गाता भव'इति वा यजमानेन प्रार्थितः उद्गाता यद्यार्त्विज्यं न करिष्यन् स्यात्तदा "नमः सोमाय राज्ञे" इत्युक्त्वा प्रत्याख्यानं कुर्यात्, 'न करिष्यामि'ति यद्यार्त्विज्यं चिकीर्षति तदानीं सोमप्रवाकं यजमानं वा प्रतिमन्त्रयेत् । "महन्मेवोचो भर्गो मे वोचो यशो मे वोचस्स्तोमं मे वोचो भुक्तिम्मे वोचस्सर्वं मे वोचस्तन्मावतु तन्माविशतु तेन भुक्षिषीय"इति ।

End:

प्रस्तोता अनूबन्धा च वपायागकाले क ईः वं वेदेति वाशं साम त्रिर्गायेत् । उदवसानीये प्रस्तोता प्रधानयागकाले गायन्तित्वेत्युद्वंशीयं साम तृचे गायेत् । ऋषिरुद्वंशीयः । अनुष्टुप् छन्दः । इन्द्रो दे० । गायन्ति त्वा गायत्रिण आ । अर्चन्त्यर्कमर्का २३ यिणाः । ब्रह्माणस्त्वा २ हो १ यि । शतक्रा २३ ताउ । उद्वंशमिवया १ यि मी ३ रे । उंद्वंशा २३४ मी । वाया ३ उवा ३ । उप् । मा ऽ २ यिरो ३५ हायि । यत्सानोः सान्वारुह आ । भूर्यस्पष्टकर्तू २३ वाम तं दिंद्रा २ हो १ यि । अर्थं चेता २३ तायि । यूथेन वृष्टिरा १ यि जा ३ तायि । यूथेना २३ वृ । ष्णायिरा ३ उवा ३ । उम् । जातो ३५ हायि । युक्ष्वा हि केशिना हरी आ । वृषणा

कक्षिया २३ प्रा । अथा ना २ हो १ यि । इन्द्रासोमा २३ साः । गिरासुपश्रुता १ यिं चा ३ रा । गिरा सू २३४ या । श्रूता ३ उवा २ । उप् । चा ऽ रो ३५ हा- यि । पूर्णाहुतिहोमपक्षेऽपि प्रस्तोतुः सामगानम् ।

Colophon: (Sheets 36 & 43)

इति श्रीमद्राजाधिराजपरमेश्वरहरिहरराजेत्यादि वैदिकमार्गस्थापना-
चार्यस्य श्रीसायणाचार्य(स्य) कृतौ यज्ञतन्त्रसुधानिधौ
औद्गात्राच्छा(वाक)प्रयोगः समाप्तः ॥

Subject: Yajñatantrasudhānidhi giving the duties of the Udgātṛ priest in the Agniṣṭoma sacrifice according to the Bodhāyana school of the Black Yajurveda.

Remarks:—The Ms. is in good condition. The Ms. originally belonged to one Gāmbhīri. On the title page is given—
औद्गात्रगणप्रयोगपुस्तकं गांभीरेः ॥

---

## ॥ प्रयोगसारः ॥

## 2604. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 3699. Page 24. Left column. **Substance**—Paper. Size—$9\frac{1}{4} \times 4\frac{1}{2}$ **inches**. Sheets—40. **Lines**— 8 to a Page. Script—Devanāgarī. No. of **Granthas**—700. Author—Keśavasvāmin. Darśapurṇamāsa only.

Beginning:

श्रीगणेशाय नमः ॥

श्रियःपतिं नमस्कृत्य कण्वञ्च मुनिसत्तमम् ।
प्रयोगसारं वक्ष्यामि केशवोऽहं यथामति ॥

नारायणादिभिः प्रयोगकारैका(रे )कं पक्षमाश्रित्य दर्शपूर्णमासादीनां प्रयोग उक्तः। आचार्यपादैर्द्वैधे पक्षान्तराण्यप्युक्तानि । भवस्वामिमतानुसारिणा मयातूभयमप्यङ्गीकृत्य प्रयोगसारः क्रियते अमावास्येनेत्यादि । प्रथमत एवामावास्यग्रहणं मन्त्रक्रमात् हविषेति सामान्यनिर्देशादेकवचनम् । पुरस्ताद्ग्रहणं कर्मारम्भात्पूर्वकाले आतञ्चनद्रव्यं यथा स्यात् । इतरथारब्धे कर्पणि द्रव्यालाभे दोषस्स्यात्। एतेनैव ज्ञापितत्वादन्यत्र आधानादिषु पुरस्ताद्ग्रहणं न करोति एवशब्दस्य न्यायादेव पूर्वकालत्वे सिद्धे यस्य प्रतिबन्धेनातञ्चनद्रव्यं न सम्भवति तस्य तस्मिन्नपि काले द्रव्यग्रहणेन दोषः स्यादिति ख्यापनार्थम् ॥

End:

यज्ञस्य पुनरालम्भं जपति यज्ञो बभूवेति । आहवनीयमेतेन यजुषोपतिष्ठेत वा । अथ प्राङ्क्र(त्क्र)म्य जपति । गोमाᳬ अग्न इति ब्राह्मणांस्तर्पयत वा इति सम्प्रेष्यति । दर्शपूर्णमासादिष्वृत्विग्भ्योऽतिरिक्तेभ्य इतरेणोपाध्यायेन भोजनव्यवस्था चोक्ता—

यत्प्रेषितं ब्राह्मणतर्पणेन तदीदृगिष्टं प्रवदन्ति सन्तः ।
दशौदनेष्टिस्तु पशौ शतं तत् सोमे सहस्रौदनमित्युवाहुः ॥

दर्शपूर्णमासयोर्द्वैपे(धे)बहुधाविकल्पा उक्ताः । ग्रन्थप्रपञ्चभयाल्लोकाननुष्ठानाच्चात्र सर्वेपि नोक्तम्(क्ताः) लोकानुष्ठितपूर्वाः कतिचिदुक्ताः अतः परमपि तथैव भवति ॥

Colophon:

इति श्रीकेशवस्वामिकृते प्रयोगसारे दर्शपूर्णमासौ समाप्तौ ॥

श्रीयज्ञपुरुषार्पणमस्तु ॥ शुभमस्तु । अविघ्नमस्तु ॥

Subject: Prayogasāra. Darśapūrṇamāsa only based on 1—18 (17) Adhyāyas of the first praśna of the Bodhāyana sūtras of the Black Yajurveda.

Remarks :— The Ms. is in good condition. The author of this work is Keśavasvāmin and he is later than Bhavasvāmin, the commentator of the Bhodhāyanaśrautrasūtras, whom the author follows throughout in this work.

---

॥ प्रयोगसारः ॥

## 2605. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 3747. Page 19, Right column.

Substance—Paper. Size—$11\frac{5}{8} \times 4\frac{7}{8}$ inches. Sheets—15. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Keśavasvāmin. Darśapūrṇamāsa only—incomplete.

Beginning, end and subject—Same as No. 3699.

**Colophon :**

इति केशवस्वामिकृते प्रयोगसारे पञ्चदशोऽध्यायः ॥

Subject: Prayogasāra—Darśapūrṇamāsa only. 1—15 Adhyāyas.

Remarks :— The Ms. is in a fairly good condition.

---

॥ प्रयोगसारः ॥

## 2606. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 9140. Page 19. Right column.

Substance—Palm Leaf. Size—$18\frac{3}{4} \times 1\frac{1}{2}$ inches. Leaves—332. Lines—5 to 7 to a Page. Script—Grantha. No. of

Granthas—8200. Author—Keśavasvāmin. Incomplete.

Beginning :— Same as No. 3699.

End:

अथैतं प्रसेकमया वा यातयति । प्रसेकस्य दण्डस्तु चमसस्यैव दीर्घश्च मध्यश्चतुरश्रं बिलमसृगिवास्य दीर्घा-कराग्रमुदुम्बरश्चाग्नेर्दक्षिणतः पश्चाद्वा प्राकारं कृत्वा प्राका-रमध्ये प्रसेकमग्न्यभिमुखं बिलं कृत्वा प्राकाराद्बहिर्दक्षिण-तो वोदङ्मुखं पश्चाद्वा प्राश्चं प्राङ्मुखमन्तस्य बिले स्रु-वेण चतुर उपस्तीर्य नोपस्तीर्य वा अध्वर्युराह अप्रमत्तः सन्ततमात्रयवसोद्धारामिगाति(मि?)ष्यामीति यत् कश्चित् सन्ततां घृतधारां प्रसेकबुद्धेन प्रक्षिपति यदाधारामिं प्रा-प्नोति तदारभते ॥

* * * *

उरुवातयेति किंशारुनिरसनं प्रतिबीजमावर्तते......

अग्नये गृहपतये जुष्टमिति कृष्णानां व्रीहीणां..........

................ व्रीहीणां............ ॥

Colophon :

(Leaf No. 126).

इति केशवस्वामिकृते प्रयोगसारे चातुर्मास्यानि समाप्तानि । शुभमस्तु । चट्टनाथाय नमः ॥

(Leaf No. 114).

हरिः ॐ । शुभमस्तु । आपदुद्धारणेन लिखितम् । केशवस्वा-मिना अग्निष्टोमः समाप्तः । चट्टनाथाय नमः ॥

Subject : Prayogasāra containing prayogas of the following sacrifices:—

दर्शपूर्णमासौ ॥ Leaf No. 1— 36

| | | | |
|---|---|---|---|
| उपव्याहरणम् ॥ | Leaf | No. | 36— ? |
| आधानम् | ,, | ,, | ?— 57 |
| दशाभ्यायी | ,, | ,, | 57— 70 |
| पशुबन्धः | ,, | ,, | 70— 94 |
| चातुर्मास्यम् | ,, | ,, | 94—126 |
| अग्निष्टोमः | ,, | ,, | 126—214 |
| उक्थ्यम् | ,, | ,, | 214—218 |
| षोडश्यादि | ,, | ,, | 218—271 |
| अग्निप्रयोगः | ,, | ,, | 271—332 |

Remarks :—The Ms. is in a decaying condition. Many leaves in this Ms. are broken.

---

## ॥ प्रयोगसारः ॥

## 2607. PRAYOGASĀRAH.

Burnell's Catalogue No. 9141. Page 19. Right column. Substance—Palm leaf. Size—18½ × 1¾ inches. Leaves—89. Lines— 6 or 7 to a Page. Script—Telugu. No. of Granthas—1800. Author—Keśavasvāmin. Incomplete.

Beginning—Same as No. 3699.

End:

शिवाः पीता भव(ती)ति प्रसङ्गादुच्यते च्छर्दयित्वा निष्ठीवं कृत्वा जपति । यदत्रापि रसस्यमितिमात्रं करिष्यन् पुरीषं वा पृथिव्यां लोष्ठमादत्ते इयन्ते यज्ञिया तनूरिति, आदाय वस्त्रादिषु बध्वा तौ करोति अपो मुञ्चामि न प्रजामँहो मुच इति । ततः शौचं कृत्वा अप आचम्य

लोष्ठं तस्मिन् देशे निदधाति पृथि....भवति। स्वप्नेऽन्न? भुक्त्वा जपति "यदन्नमद्यते" इति। लोहितमुत्पतितं दृष्ट्वा कण्डूय वा जपति स मे रुद्रियाभ्य इति। वर्षे यदि गूपन्नमो वायव इत्येतामृचं जपेदिमानि नित्यानीति केचिदवान्तर-दीक्षयै। विसर्गादित्यन्ये। पुरानक्षत्राणामन्तर्धानादुत्तरेणा हवनीयं ति....

Subject: Prayogasāra, containing prayogas of the following sacrifices :—

| | | | |
|---|---|---|---|
| 1 | दर्शपूर्णमासौ | Leaf | 1 |
| 2 | आधानम् | " | 25 |
| 3 | दशाऽध्यायी | " | 28 |
| 4 | पशुबन्धः | " | 44 |
| 5 | चातुर्मास्यम् | " | 59 |
| 6 | सोमप्रयोगः | " | 80 |

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks off in the middle of Somaprayoga.

---

॥ प्रयोगसारः ॥

## 2608. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 3720. Page 19. Right column. Substance—Paper. Size —$9\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheets—195. Lines—8 to 12 to a Page. Script—Devanāgarī. No. of Granthas—3450. Author—Keśavasvāmin. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

श्रीदक्षिणामूर्तये नमः ॥ हरिः ॐ ॥

इष्टिपशुचातुर्मास्यैरित्यनेन क्रमेण पशोरनन्तरं चातुर्मास्यान्युच्यन्ते । तेषां चत्वारः प्रयोगप्रकारा आचार्येणोक्ताः । एकस्तावद्यावज्जीवप्रयोगः । सांवत्सरप्रयोगो द्वितीयः । द्वादशाहप्रयोगो, यथाप्रयोग इति । द्वादशा(ह)यथाप्रयोगयोरपरपक्षे यथा समाप्तिर्भवति तथा कर्तव्ये । यावज्जीवसांवत्सरप्रयोगयोः फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यामुपक्रमः । नक्षत्रप्रयोग इत्येतस्य विशेषणमुदगयन इत्यादि । यावज्जीवसांवत्सरी(रि)कयोः फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यामिति । नान्यः कालः ।

End :

देविकानामाज्यपक्षे त्रयः पक्षाः, आज्यपक्षे भेदेनानुष्ठाने प्रयोगः, औषधपदार्थवर्जमन्यद्भवति सर्वं यथार्थपात्राणि पात्रप्रोक्षणानन्तरं आज्यनिर्वापादि पर्यग्निकरणांतं ततो वेदा दानादि ध्रुवाज्यात् प्रधानानि स्विष्टकृदिडाञ्च इध्मप्रव्रश्चनाभ्यभ्याधाय फलीकरणै...........
कुर्याद्वा न वा प्रसिद्धं ब्राह्मणतर्पणान्तरम् । एवमुत्तराण्यपि आमिक्षापक्षे च देविकानां चाज्येना...........
ज्याद्देवीका इज्यन्ते । अनुमती राका धाता सिनीवाली कुहूरिति पञ्चदेवताः । मध्यमं धातारं करोतीति अनुमतिराकाधात्रे उत्तराणिसिनीवाली कुहूधात्रे स्वानि स्वानिग्रहे नित्यानि अ........ ॥

**Colophon**: (sheet No. 170)

इति श्रीकेशवस्वामिकृते प्रयोगसारे माध्यन्दिनं समाप्तम् ॥

Subject: Prayogasāra—Cāturmāsya and Agniṣṭoma only based on the 5—8 Praśnas of the Bodhāyanasūtras of the Black Yajurveda.

Remarks :—The Ms. is in very good condition. This Ms. breaks off towards the end of Agniṣṭomaprayoga.

---

## ॥ प्रयोगसारः ॥

## 2609. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 3782. Page 19. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{7}{8}$ inches. Sheets—22. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Keśavasvāmin. Vājapeya only.

Beginning:

श्रीगणेशाय नमः ॥

अथ केशवस्वामिकृते प्रयोगसारे

[सर्वपृष्ठासोर्यामः] वाजपेयस्य प्रयोग आरभ्यते ।

वाजपेयो नित्यः संस्थान्तःपातित्वात् । काम्यश्चाग्नि-ष्टोमानन्तरं प्रयोक्तव्यः । ब्राह्मणराजन्ययोरेवाधिकारः । रथन्तरपृष्ठः वाजपेयोऽग्निश्चेतव्यो वा न वा । वाजपेयं क-रिष्यमित्यादि । स उपकल्पयते । कृष्णाजिनमित्यादिप्रसि-द्धाः ।

* * *

शरदि पौर्णमास्यां प्रतिपदि वा सुत्या स्यात्तथा वा वसन्ते पौर्णमास्यां वा तथा दीक्षितव्यः । " याः पुरस्ता-

त्" इत्यादि सप्तदशस्तोत्रेण सप्तदशशस्त्रेण रथन्तरसाम्ना [सप्तदश] सप्तदशदक्षिणेन स्वर्गकामः आधिपत्यकामो वा ऋद्धिकामो वा सर्वकामो वाजपेयेन सोमेन यक्ष्य इति सङ्कल्पः ॥

End:

अथैताश्रमसानित्यादि । अथ संप्रैषमाह— अग्नीदौपयजानङ्गारानित्याद्येकैकं गुदतृतीयमेकादशधा कृत्वा सर्वान्पुनरेकादशधा कृत्वोपयजति । समस्ताननुप्रहृत्य सर्वमन्त्रैरनुमन्त्रयेद्वा । समानमत ऊर्ध्वमुदवसानीयान्तम् । एवं क्रतुशेषं समाप्यानन्तरममावास्यायां प्रतिपदि वा [काम] कामनावर्जं प्रत्यवरोहणीयसंज्ञेन चतुष्टोमेनाग्निष्टोमेन वाजपेयाङ्गभूतेन यजेत । सन्तिष्ठते वाजपेयेनेत्युक्ते पुनः सन्तिष्ठते वाजपेय इति वाजपेयग्रहणं प्रत्यवरोहणीयस्य वाजपेयस्याङ्गत्वख्यापनार्थम् ॥

Colophon:

इति केशवस्वामिकृते प्रयोगसारे वाजपेयः समाप्तः ॥

Subject: Prayogasāra. Vājapeyaprayoga only based on Bodhāyanaśrautasūtras of the Black Yajur-Veda.

Remarks :— The Ms. is in good condition.

---

## ॥ प्रयोगसारः ॥

## 2610. PRAYOGASĀRAH.

J. L. Collection No. 260. Substance—Paper. Size—10×4 inches. Sheets—18. Lines—9 to a Page. Script—Deva-

nāgarī. No. of Granthas—400. Author—Keśavasvāmin. Vājapeya only.

Beginning, end, colophon and subject—Same as No. 2609.

Remarks :—The Ms. is in good condition.

---

## ॥ प्रयोगसारः ॥

## 2611. PRAYOGASĀRAḤ.

Burnell's Catalogue No. 9172 b. Substance—Palm Leaf. Size—16 × 1½ inches. Leaves—16 (42—57). Lines—8 to a page. Script—Grantha. No. of Granthas—480. Author—Keśavasvāmin. Nakṣatreṣṭi only.

Beginning:

अथातो नक्षत्रेष्टिं व्याख्यास्यामः ।

"अग्निर्वा अकामयत । अन्नादो देवानाँ स्यामिति" ता ब्राह्मणव्याख्याता(:) [म]साया वैशाख्या पूर्णमास्याः पुरस्तादमावास्या भवति । सा सकृत्संवत्स्यापभरणिस्सम्पद्यते ! तस्यामारभेतेति तस्यामुपसेधोरण्योरग्नीन्समारोप्य उदवसाय मथित्वाग्नीन्विहृत्याजस्रान्वापि वा पौर्णमासीममावास्यां वोपवसेत् । यद्यस्यां तल्लक्षा संपद्यते, तत्रैषोत्यन्तप्रदेशो हविरुच्छिष्टव्रतो भवतीति विज्ञायते। अपि वा जन्मनक्षत्रे कुर्यादायुष्कामस्त्यवराद्ध्यों वा प्रयोगो जीववन्तावाज्यभागौ यजति "आनो अग्ने सक्केतुना त्व सोम महे भगम्" इति ॥

End:

